संयुते कुर्याच्छ्रावणं कर्म यद्भवेत् तत्कर्म सफलं ज्ञेयं उपाकरणसंज्ञकं श्रवणेन तु यत्कर्म
सुत्तराषाढसंयुतं संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यति हेमाद्रावुक्तेः अत्र विशेषः ॥ एम॰
पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जितं इति १५
प्रयोगपारिजाते गार्ग्योक्तेः अत्र काल विशेषः अत्रार्धरात्रादर्वाक् चेत् ग्रहसंक्रां
तिर्भवेत्तदा नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेन चेति प्रयोगपारिजाते वृद्धमनूक्तेः ॥

= ग्रहसंक्रांत्यादौ न कुर्यादिति =२

= उपाकर्मवर्जनाभितस्त्र न कुर्यात् =३

यदा १

अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणं तथा उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति प्रयोग
पारिजाते कात्यायनोक्तेः भ्रगुरुस्तु प्रेतेराजनि राष्ट्रे वा परचक्रादिपीडिते अनुत्पत्य वी
जेना वृष्ट्या नोपाकुर्याद्विचक्षणादिति वसिष्ठोपि अनुत्पत्य वीजेनृपतौ विनष्टे स्वतेम इति नास्ति ...
ते राष्ट्रसमाकुलेच उत्सर्जनोपाकरणे न कार्यं ग्रस्तेंदुसूर्ये गुरुरस्तयाते गुरावस्तादित्य
र्थः यत्तु वचनं वेदोपाकरणप्राप्तं कुलीरे संस्थिते रवौ उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्त कर्क ६
इति तद्देशांतरविषयमेव कुलीरः कर्कसंक्रांतिः नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्त कर्क
टे संस्थिते सूर्ये उपाकुर्यात्तु दक्षिण इति प्रयोगपारिजाते बृहस्पत्युक्तेः एतत्सर्वं विचार्य
श्रावणभाद्रपदमासयोरन्यतरस्मिन्नुक्तदिने कर्तव्यं श्रवणर्क्षे आद्यो घटिका चतुष्टया
~~मितिर्जिन्न श्रवणेन वर्ज्यं~~ दाश्रवणे वा तिने सति धनिष्ठासंयुक्ते या ह्युत्तराषाढासंयुतं
हस्तनक्षत्रपंचमी ग्राह्या सूतकादिविघ्नसंभवे चोषध्युत्पत्त्यभावे च श्रावणभाद्रपदयोरक
स्मिन्दिने ग्रहणसंक्रांतिवर्जिते कार्यं न कालापकर्षोत्कर्षश्चेति स्मृत्यर्थसारोक्तेः यत्तु

का॰ च॰
१६

रण्येयाम्रवचनं श्रावणस्यतुमासस्यपौर्णिमास्यांद्विजन्मनां आषाढ्यांप्रोष्ठपद्यांवावे
दोपाकरणंस्मृतमिति अत्रआषाढ्याकर्तव्यमिति यदुक्तं तच्छाखांतरमेव आश्वला
यनानांतुश्रावण्यांकर्मेति पूर्वोक्तगृह्यसमाख्याबलात्तेषांवर्षासुवेदोपाकर्मेति गम्यते
५ गुरावस्तादौनकार्य मिस्कर्म ॥५ यत्तुवचनं शुक्रेमूढेउपाकर्मविद्यावित्तविनाशनं आयुःक्षयमवाप्नोति तस्मात्कर्मवि
वर्जयेदिति कश्यपोक्तेः तदेतत्प्रथमोपाकरणविषयं गुरुभार्गवमौढ्येवाल्येवावा
पि६ र्द्धक्येवा तथाधिमासेसंसर्पमलमासादिषु द्विजाः प्रथमोपाकृतिर्नस्यात्कृतंकर्मविन
श्यतीतिहेमाद्रौसंग्रहेकश्यपोक्तेः नित्यंतुकुर्यादेव यज्ञोपवीतकर्तव्यंश्रावणेगुरुशुक्रयोः॥
मौढ्येवावार्द्धक्येवाल्येनित्यवत्कर्मदृष्टिनिमिति प्रयोगपारिजातेस्मृतिसारसमुच्चयोक्तेः पात
तथाच चंद्रांशोमिंदलंप्राप्तेयदाशुक्रबृहस्पती सर्वकर्मनिवृत्तिःस्यान्नित्यनैमित्तिकं एम
विनेतिस्मृतिभास्करोक्तेश्च तथाच नित्यनैमित्तिकंजाप्यंहोमयज्ञक्रियासुच उपाकर्म १६
णिचोत्सर्गेग्रहवेधोनविद्यतइतिप्रयोगपारिजातेसंग्रहोक्तेः अत्रप्रथमारंभेवृद्धिश्रा ग्रहोत्सेश्च=९

---

पि॰ द्धंकुर्यादितिनारायणवृत्तावुक्तेः एतच्चाधिमासेनकार्यं उपाकर्मतथोत्सर्गेप्रसवाहस्तथा
ष्टकाः मासवृद्धौपरेकार्यावर्जयित्वातुपैतृकमितिज्योतिःशास्त्रचंद्रिकायांपराशरोक्तेः उ
त्तरमासिचकार्यइत्यर्थः प्रसवाहोत्सवशब्देनजातेष्टिर्लक्ष्यते उत्कर्षःकालवृद्धौस्यादुपा
वचनंदशहरासुनोत्कर्षः श्चतुर्थ्यपियुगादिषु=५ कर्मादिकर्मणि अभिषेकादिवृद्धौनांनतूत्कर्षोयुगादिष्विति निर्णयसिंधौकात्यायनो
क्तेः यत्तुउपाकर्मणिचोत्सर्गेह्नोनदिरजस्वलादैतइतिहेमाद्रौऋष्यशृंगवचनंतत्समगवि स्त
४ प्रतिपत्कृपावर्मनि यानिधानानहेः४ षयं तेषांसिंहार्केउएवउक्तेः अन्यच्च यत्तु प्रतिपन्मिश्रितेनैवनोत्तराषाढसंयुते श्रवण
श्रावणंकार्यंयहस्तंकीर्तिवर्जितइतिप्रतिपन्मिश्रनिषेधकवचनंनिर्मूलमितिनिर्णय
रितिस्मृत्यंतरोक्तेः३ सिंधावुक्तं श्रावण्यांप्रोष्ठपद्यांवाप्रतिपत्समुहूर्तके विधयाछंदसांतत्रोत्सर्गोणउ
सोत्सर्जनं पाकृतिः चेदितिविशेषः एतच्चापराह्णेकार्यं उपाकर्मापराह्णेस्यादुत्सर्गःप्रातरेवहि
२ कृत्सभरीयि तिकात्यायनोक्तेः अध्यायानामुपाकर्मकुर्यात्कालेपराह्णके उत्सर्जनंपूर्वाह्णेविधि
रेषसनातनइतिहेमाद्रौगोभिलोक्तेः अध्यायानामुपाकर्मसोत्सर्गंविधिवद्द्विजः क्षिपत
तथा२ १=उभयोःकर्मणोरेकस्मिन्दिनेसतस्यकालविशेषः।=१

अत्रप्रथमारंभेवृद्धिश्राद्धंकुर्यात् प्रथमारंभेवृद्धिश्राद्धंकुर्यादितिनारायणवृत्तावुक्तं।३

Indira Gandhi National
Centre for the Arts

का०वं १७

कर्मणानेनसद्यात्वाप्यायनंभवेदितिकात्यायनोक्तेः एतयोस्त्यागेदोषस्तेनैवोक्तः उत्सर्जनंहि
वेदानांउपाकरणमेवच अकृत्वावेदजाप्येनफलमाप्नोतिकर्मणामिति अस्यारंभस्तुपू
र्वाह्णेकार्यः अस्यतुविधिपूर्वाह्णकालस्मृतिदीपिकोक्तेः "आपस्तंबेरोदयिकंपर्वग्राह्यं
पर्वण्योदयिकंकुर्युः श्रावणेतैत्तिरीयकाइतिइतिगार्ग्योक्तेः "श्रावणीपौर्णमासीतुसंगवात्प
रतोयदि तदैवोदयकीग्राह्यानान्यदोदयिकीभवेदितिपाराशरमाधवीयेऔदयिकेपिविशे
षउक्तः कात्यायनादीनांतुदिनद्वयेयोगेपूर्वाह्णव्याप्तौवर्कदेशस्पर्शेवा पूर्वेवपौर्णमासी
तिहेमाद्रिः सामगास्तुश्रावणेमासिहस्तेकुर्युः शुक्लपक्षेतुहस्तेनउपाकर्मापराह्णिकमि
तिधर्मतत्त्वकौमुद्यांगोभिलोक्तेः बहृचाः श्रवणेकुर्युः हस्तर्क्षेसामशाखिनामिति एवं
स्वस्वसूत्रोक्तेदिनेयथाकालंविचार्यकर्मकुर्यात् "इतिप्रयोगपारिजाताद्यनुसारीउपाकर्म
निर्णयः॥ ॥अथात्रयज्ञोपवीतहोमकालनिर्णयः॥ ॥अत्रसोविषकृतंहुत्वादधिसक्तुप्रा
शनोत्तरमेवयज्ञोपवीतंहुत्वाधारयेत् तथाचस्मृतिसंग्रहे प्राशयेद्दधिसक्तूनामुपवी

ये

गार्ग्योक्तेः तथा-१

के

२ थोपाकर्मणि

अत्र तथा योक्तेः वेद ... एम १७ सि०२

३ = अत्रत्रिरात्रपक्षिण्याहोरात्रंवानध्यायइतिमिताक्षर = इला सु:२
रायाकुर्के::नात्रनदीनांरजोदोषः।उपाकर्मोत्सर्जनविधौ=
नदीनांरजोदोषोनास्तीतिगार्ग्योक्तेः॥इत्युपाकर्मनिर्णयः॥

---

तपरिग्रहः मार्जनेवेध्यसंबंधाभावेस्विषकृतेसतिं तथाचस्मृतिदर्पणेगालवः दधिसक्तू
नयप्राश्यपरिगृह्यापवीतकं हुत्वाग्नौगुरवेदत्वापितन्नधारयेत्स्वयमिति तथाचसत्य
व्रतः यज्ञोपवीतानिनवानिकृत्वासक्तूश्चसंप्राश्यहुनेतथाग्नौ स्वयंचदत्वात्मपितव्यदद्
त्यमुपाकृतोधार्यइतिप्रसिद्धइति तथोचभगवनभास्करेणस्मार्तनिः वेदारंभणानःप्र
विशत्सुप्राशनतः परं नवयज्ञोपवीतानिहुत्वादत्वाचधारयेदित्येन्यनिवंध्येप्यवमिति
जीर्णोपवीतानित्यजेत् उक्तंपाराशरस्मृ तौ उपवीतंनववस्त्रंकटिसूत्रंचमेखला धा
रयेदजिनदंडंपुराणान्यप्सुवाक्षिपेत् वाशदेनब्राह्मणायदद्यादितिभावः इतिउप
वीतहोमकालनिर्णयः अथात्रैवरक्षाबंधनिर्णयः "तनोपराह्णसमयेरक्षापोट्लि
कांशुभां कारयेदक्षतैःशस्तैःसिद्धार्थैर्हेमभूषितैरितिहेमाद्रौभविष्योक्तेः तत्रमंत्रः येन
वद्धोवलीराजादानवेंद्रोमहाबलः तेनत्वामपिवध्नामिरक्षेमाचलमाचलेतिनित्योक्ते
लाभ्यंगः संवत्सरप्रतिपदावत् ततुप्रतिपद्युक्तापानेवकार्या नंदायादर्शनेभद्रायांचरक्षा

इतिसत्यव्रतोक्तेः

दि

=इतिपाराशरस्मृतौ मु०सं०:५

=स्मृतिदर्पणेगालव... तथा...

चैव२

४= अत्रैवरक्षाबंधंकुर्यात् यत्तुप्रतिपद्युक्तायांभद्रायांस्वनकार्यं प्रतिपद्युक्तायांभद्रायांचरः
क्षाबंधनंनकुर्यामितिमदनरत्नेब्रह्मवैवर्तोक्तेः॥दिवाभद्रासत्वेलरात्रावपिभद्रांतेकुर्यादितिनिर्ण
यामृतोक्तेः॥तत्पथा॥=४

२= श्रावण्यांःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमानवैः॥=
कर्तव्योरक्षिकाकारोद्वारात्संदस्यशक्तितःइतिहे=
माद्रावुक्तेः॥=२

Indira Gandhi National
Centre for the Arts

१ = याति कास्तु दौर्णमादर्शशदयोः पर्वान्तक्षणवद्धोरा अथवा चयिवाततैव कर्मकालव्याप्तिर्थी चेति —
= विस्तृतिवांछिपर्वणि छति। अत्र ग्रहणे सति पूर्वं पश्चाद्देवकार्यं। निर्णयस्तु होलानिर्णये चावगंतव्यः। इति श्री० याश्रा० नाः १

८२

का० वं० १८ बंधनं नेति मदनरत्ने ब्रह्मवैवर्तात् तत्सत्येतु एतावपि भद्रांते कुर्यादिति निर्णयामृतो
क्तेः रक्षाबंधननिर्णयः अत्राभ्यंगो नित्यः संवत्सरप्रतिपदावत् इति रक्षाबंधननि
र्णयः अथात्रैव हयग्रीवोत्पत्तिनिर्णयः श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिरिति १ १ कल्पतरावुक्तेः ३ ... संवत्सरप्रतिप ... ३
धर्मतत्त्वके मुख्या कल्पतरूक्तेः इति हयग्रीवोत्पत्तिनिर्णयः अत्र ग्रहणे सति तत्पूर्वं पश्चा
दिदं कार्यमेव वक्ष्यमाणहोलायां ग्रहणनिर्णये चापनिर्णयो वगंतव्यः अथात्रैव श्राव
द्वि० लायनानां श्रवणाकर्मनिर्णयः इदं गृह्ये आवण्यां पौर्णमास्यां श्रवणाकर्मेति तत्रास्त
मयव्यापिनी ग्राह्या अस्तमये स्थालीपाकं अपयित्वेति नतसूत्रात् इति श्रवणाकर्मनिर्णयः॥
अथ कृष्णजन्माष्टमीनिर्णयः साप्यौर्णमास्यान्तपक्षे भाद्रपदे दर्शान्तपक्षे श्रावणे अत्र सप्त म० १८
मीवेध्याया अष्टम्याः रात्रिमात्रसत्त्वेति भवत्यव वेधः पूजारूपस्य प्रधानस्य अर्धरात्रकर्म
व्यत्वात् अर्द्धरात्रकालावच्छिन्नेव पूजाप्रधानं रोहिणीसहिता कृष्णा मासि भाद्रपदे घ
मी सप्तम्यार्द्धरात्रार्द्धः कलयापि यदा भवेत् तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः
नमेवोपवसेत्कालं तत्र कुर्याज्जागरमिति धर्मतत्त्वके मुख्यो विष्णुधर्मोत्तरात् अष्टमीरो
१ अथ भाद्रपदमासः। तत्र सिंहसंक्रमे परा[illegible]षोडशनाड्यः पुण्याः। अन्यत्सा[illegible]। अत्र सुवर्णपात्रदानं[illegible]। अत्र गोप्रसवोत्सवो[illegible]हेना[illegible]। भानौ सिंहगते[illegible]
[illegible]। ततो[illegible]। तथा सिंहे[illegible]। तदा[illegible]। अस्य[illegible]
[illegible]। अत्र[illegible] कार्याः। भाद्रकृष्ण[illegible]। अस्यामेव[illegible]
[illegible]
[illegible]। मदनरत्ने[illegible]

हिणीयुक्ता निशार्द्धे दृश्यते यदि मुख्यकालः स विज्ञेयः तत्र जातो हरिः स्वयमिति निर्णयसिंधौ
वसिष्ठोक्तेश्च मुख्यस्य प्रधानस्य कालः पूजायाश्चप्यतएव प्राधान्यं उपवासस्य अहोरात्र
तद्दयं से ३ साध्यत्वादर्धरात्रस्य दर्थ्यक्षयामुख्यत्वानुपपत्तेः द्विविधापि प्रत्येकं द्विधा द्वितीयदिने
सूर्योदयमतिक्रम्य विद्यमाना अविद्यमाना चेति तादृशापि प्रत्येकं द्विधा रोहिणीयोगस
य हिता तद्रहिता चेति तत्र पराष्टमी सूर्योदयानंतरं अविद्यमाना रोहिणी सहिता तद्रहिता वा
तथैव विद्धापि तदा तत्र न संदेहः द्वितीयदिने अष्टम्याभावात् पौर्णमाविद्धा वा सतिप
रेहनि सति अन्यतरस्मिन्नेव दिने रोहिणीसहिता सैव ग्राह्या प्राजापत्यर्क्षसंयुक्ता कृष्णा
नभसि चाष्टमी मुहूर्तमपि लभ्येत सैवोपोष्या महाफला मुहूर्तमप्यहोरात्रे यस्मिन्युक्तं हि ल
भ्यते अष्टम्यां रोहिणी ऋक्षं तां सुपुण्यामुपावसेदिति विष्णुरहस्यवचनात् तेन निशी
थव्यापिनी मुख्यामपि वा पूर्वां परित्यज्य उत्तरैव जन्माष्टमीव्रते ग्राह्या उत्तरदिन एव रोहिणी
योगसत्त्वे कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी नृप जयंती नाम सा प्रोक्ता उपोष्या सा प्र
यत्नत इति वह्निपुराणाच्च कर्मकालव्याप्तिः शास्त्रस्य बलत्वात् उत्तरदिन एव रोहि

Indira Gandhi National Centre for the Arts

वैकुंठे स५ धि२ या॰ वार दू१

का॰ चं॰ णीसहितायामपि पूर्वैव निशीथे वर्त्तमाना या विद्धापि क्वापि संपूर्णत्वाद्दिवहनरणयोगात् शु
१९ द्धाधिकापाऽपि पूर्वैव पुरेव शिष्टानां ग्रहणं धर्मतत्त्वकौमुद्यां दिवा यदि वा रात्रौ नास्ति चेद्रो
हिणीकला रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुतामिति वचनाद्रोहिणीयोगाभावविषयं॥ नं
यातु शुद्धाधिका पूर्वदिने निशीथे रोहिणीयुक्ता निशीथं विहाय वा रोहिणीयुक्ता उत्तर
दिने च तद्युक्ता दिनद्वयेपि वा रोहिणीरहिता सा पूर्वैव सकलाहोरात्रव्यापित्वात् प्रथमा ममतिप
क्रमेहत्वाभावाच्च यातु शुद्धाधिका अन्यतरस्मिन्नेवादिने निशीथे रोहिणीसहितासं साचैद
सहिद वतादृशी सैव ग्राह्या सप्तमीयुता अष्टम्यां निशीथे रोहिणी यदि भवेद् साष्टमी पुण्यपाया
वच्चंद्रदिवाकरौ इति वह्निपुराणात् पूर्वैव ग्राह्या प्रतिपन्ने मासि भाद्रपदेऽष्टम्यां कृष्णप सतोप
क्षेऽर्द्धरात्रके शशांके वृषराशिस्थे प्राजापत्यर्क्षसंयुते उपोषितोऽर्चयेत्कृष्णं यशोदादेवकीत राम
ष्येति अविद्धायां सनक्षत्रायां जातो देवकीनंदन इति च निर्णयामृते भविष्योत्तराच्च शु १९
द्धोत्तरा प्रतीतेः यातु शुद्धाधिका दिनद्वये निशीथे रोहिणीयुक्ता सा उत्तरैव वर्जयित्वा
प्रयत्नेन सप्तमीसहिताष्टमी सनक्षत्रापि न कर्तव्या सप्तमीसहिताष्टमीति ब्रह्मवैवर्तात्॥

---

तिमाधव:५ धभा५ यातं५ शु१

म्य प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमित्युपक्रमकालमारभ्य तिथेः सत्त्वाच्च यातु विद्धाधिकादि उत्तर२
ग्राह्या२ नद्वयेपि निशीथं विहाय रोहिणीसहिता साप्युत्तरैव पूर्ववाक्ये सप्तमीविद्धायानिषेधात् यावि मेद
धि२ द्धाधिकादिनद्वये रोहिणीयोगरहिता न स्यात्सा त्रेधाः अन्यतरस्मिन्नेवमीदिने निशीथे
स्या४ वर्त्तमाने त्वेका इयं यादृशी सैव ग्राह्या दिवा चेति वाक्यात् दिनद्वयेप्यर्द्धरात्रे विद्यमानाद्वि निशीथेप
=दिनद्वयेपि निशीथे विद्यमानात् तीय५ तीयैषा उभयत्राप्युत्तरैवेत्यादि विचार्य संप्रदायेन कुर्यात् अत्र कृत्यमुक्तं हेमाद्रौ भविष्ये ततो
ष्टम्यां तिले स्नातो नद्यादौ विमले जले सुदेशे शोभनं कुर्याद्देवक्याः सूतिकागृहं तन्मध्ये प्रतिमा
स्थाप्या सा चाप्यष्टविधा स्मृता कांचनी राजती ताम्री पैत्तली मृण्मयी यवा वार्क्षी मणिमयी तथा दाक्षा
चैव वर्णकैर्लिखिताथवा सर्वलक्षणसंपूर्णा पर्यंके च पटावृते देवकी तत्र चैकस्मिन्प्रदेशे
सूतिकागृहे प्रसूता च प्रसुप्ता च स्थाप्या पर्यंकचक्रोपरि मां तत्र बालकं सुप्तं पर्यंके स्तनपायिनं॥
यशोदा तत्र चैकस्मिन्प्रदेशे सूतिकागृहे तद्वच्च कल्पयेत्तां प्रसूतां नवकन्यकां कश्यपो वसु
देवोयमदितिश्चैव देवकी शेषश्च बलभद्रोयं यशोदादितिरव्यभूत् नंदः प्रजापतिर्दक्षो
गर्भश्चापि चतुर्मुखः गोपीजनं कुंजरश्चैव दानवाः शस्त्रपाणयः लेखनी यश्च तत्रैव कालि

Indira Gandhi National Centre for the Arts

=परिवारयुतो भवान्। यथा पुत्रं हरिं लब्ध्वा प्राप्ता ते निर्वृतिः परा। मामेव निर्वृ=२
=तिर्देहि सुपुत्रं दर्शयस्व मे इति देवक्यार्घ्यः॥१

६=धर्मसमाहितः। शंखे तोयं समादाय सपुष्पाक्षतचन्दनम्=
=जानुभ्यामवनीं गत्वा चंद्रायार्घ्यं=६



कंदैव

योयमुनाह्रदे इत्येवमादि यत्किंचित्कृष्णकृते चरितं मम लेखनीयः प्रयत्नेन पूजयेद्भक्तितत्परः म
का०चं० २० त्रेणानेन कौंतेय देवकीं पूजयेन्नरः गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः
भृंगारादर्शकुंभः प्रवरकृतकरैः सेव्यमाना मुनींद्रैः पर्यंके स्वास्तृते या मुदिततरमुखा पुत्रिणी
सम्यगास्ते सा देवी देवमाता जयति सुतनया देवकी कांतरूपा पादौ संवाहयंती श्रीर्देवक्याश्चर
णांतिके निषण्णा पंकजे पूज्या नमो देव्यै श्रियै इति अर्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा ना
डीवर्द्धापनाषष्ठीनामादेवीरणं मम ततो मंत्रेण चंद्राय देवायार्घ्यं निवेदयेत् क्षीरोदार्णव
संभूत अत्रिगोत्रसमुद्भव गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशी ज्योत्स्नापते नमस्तुभ्यं
नमस्ते ज्योतिषांपते नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतां जातः कंसवधार्थाय भूभा
रोत्तारणाय च गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ततः प्रभाते ब्राह्मणान्भोजयेद्भक्त्या राम २०
भोजयेद्भक्तितो द्विजान् ॐ नमो वासुदेवाय गोब्राह्मणहिताय च शांतिरस्तु शिवं चास्तु
इत्युक्त्वा मां विसर्जयेत् इत्यं प्रतिमां कृष्णाष्टम्यां कुर्यादिति मद०। ततस्तु वन्हिपुराणोक्तः इति
कृसं० जन्माष्टमीव्रतं अथ जन्माष्टमीपारणनिर्णयः तिथ्यंते पारणं कुर्यादृक्षभूत्यतिथिव्रते॥

१=तिथिभांते च पारणं कुर्यात्तिथेर्वा विशालाभारत पारणेपि तिवकृपुराणोक्तेः। तथा। जयंत्यां पूर्वविद्धायामुपवासं समाचरेत्। तिथ्यंते चोत्सवांते वा व्रती कु=
र्वीत पारणमिति गरुडविष्णुधर्मयोरुक्तेः। तथा तंत्रेपि। तिथ्यंते तिथिभांते वा पारणं यत्र चोदितं। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति स्मृ= ... इति कालादर्शोक्तेः। इति संक्षेपः। इति पारणं। इति जन्माष्टमीनिर्णयः॥ -१
चोत्सवांतः। तिथ्यंते चोत्सवांते वा व्रती तु ...

तिथिनक्षत्रसाम्ये तु उभयांते महानिशः भुक्तिश्चेत्संभवेदृक्षतिथ्यंते पारणं भवेत् उभयां
तो न लभ्यश्चेत्तस्मिन्नेवाह्न्यपि तत् अत्र मूलवचनानि तत्रतत्रावलोकनीयानि जन्मा
ष्टमी रोहिणी च शिवरात्रिस्तथैव च पूर्वविद्धैव कर्तव्या तिथिभांते च पारणं जयंती शिवरा
त्रिश्च कार्या भद्राजयान्विता कृत्वोपवासं तिथ्यंते तदा कुर्याच्च पारणं तिथ्यर्क्षयोर्यदा छे
दो नक्षत्रांतमथापि वा अर्धरात्रे यदा कुर्यात्पारणं त्वपरेहनि अनक्रमविहीनाय कुर्युश्छे
पारणं निशि निषिद्धत्वाद्यतो रात्रौ परतः पारणं भवेत् यत्तन्यासविषयं दिवैव पारणं
कुर्युरित्याद्यपि च मोहात्कुर्वीत पिरात्रौ न लभेत् पूर्वव्रते पारणं तिथिभांते च कुर्या
दृक्षस्य वा क्षये अन्यथा पारणं यात्व्रतभंगमवाप्नुयात् पाद्मे तिथयः प्रोक्ताः पुण्य
नक्षत्रयोगतः ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणी तिथ्यंते चैव भांते च पारणं च
यत्रोदितं रवेरस्तादधोत्तेयं परतश्चेन्न दुष्यति व्यासपादैः अहन्येव हि जानीयात् तिथिभांते
च पारणं तिथ्यृक्षयोश्चात्ययनं स्याच्चेत्तदा पारणं दिवा यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पा
रणं तिथिपामत्रयादर्वाक् तिथिभांते च पारणं यत्किंचिल्लिखितं विस्तरभीतेर्न लिखितं

Indira Gandhi National Centre for the Arts

५=भाद्रमासे कुशग्रहणं कुर्यात् । भास्ते नभस्य मासे वा स्यात् तस्यादर्शे च योगतः ॥ अथात्र तन्मासे दर्शे विनियोज्याः पुनः पुनः इति हेमाद्रौ हारीतोक्तेः ॥ नभः श्रावण [redacted] दर्शे तेन दर्शे तन्मासे जन्माष्टम्यनंतर दर्शे लिभ्यते । तत्र=५

का॰ चं॰ २९ इदं व्रतं नित्यं काम्यं श्रावणबहुलपक्षे कृष्णजन्माष्टमीव्रतं न करोति नरो यस्तु भवति क्रूरराक्षस
इति निर्णयसिंधौ भविष्योक्तेः अकरणे प्रत्यवायश्रवणात् जन्माष्टमीव्रत येवप्रकुर्वीत नि
रोत्तमाः कारयेन्नयवालो यावल्लक्ष्मीस्तेषां सदा स्थिरेति स्कांदे फलश्रवणात् श्रावणीस्तमा
वास्यायां कुशग्रहणमुक्तं दर्शे श्रावणमासस्य समंत्रोत्पाटिताः कुशाः अयातयामास्ते पाले
नियोज्याः सर्वकर्मसु इति मदनरत्नोक्तेः कुशग्रहणे मंत्रः विरंचिना सहोत्पन्न परमेष्ठि
निसर्गज नुद सर्वाणि पापानि दर्भस्वस्तिकरो मम हुंफट्कारमंत्रेण सकृच्छित्वा समुद्
रेति स्मृत्यर्थसारे ॥ ॥ इति कालोपनामक॰ कालनिर्णयचंद्रिकायां श्रावणमासकृत्यनि
र॰ । अथ॰ १ र्णयः अथ भाद्रपदमासनिर्णयः तत्र भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतं तृतीया न
मतः शुक्लाम धुश्रवणाकास्मनो भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका तद्दिवोदा
सीयोक्तेः इयं परैव ग्राह्या मुहूर्तमात्र सत्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः इयं परैव
प्रदोषव्यापिनी च प्रशस्ते ति स्कांदोक्तेः अत्र द्वितीयायुक्ता तृतीया अत्यंतनिषेधेति
दिवोदासीये ब्रह्मवैवर्तोक्तेः अत्रापि प्रदोषकाले एव पूजा कार्या प्रदोषे पूजनं कुर्यात् द्विवो

सोहारहत वृ चैना चे ॥ गौर्याः पूजनं तृप्रदोषकार्यालो यीयाः पूजनं कुर्या दिवः शिवा=३

तृ॰ कीयते राम २९ उरः ग्रे मे गोवर्धना व्रतविधर्म्य ब्रलवे व्रते द्वितीया युक्ता निषेधात् इदं मात् तीया पुनर्भवास्या उत्सार्हरिताल ब्रि तिमात्रृष्यम् तृतीया पु ३ मात॑ कौरव तत

=कुधयुक्ता महतीरूच्यते । हितिभविष्यात् इयं परैव पते व चापि नी चेत्तादिन प्रशस्ता=

=अथ भाद्रपद शुक्लचतुर्थी वरदचतुर्थी=२

याः शंकरस्य चेति स्कांदोक्तेः इयमेन्वादिः इति हरितालिकाव्रतनिर्णयः अथ प्रसंगात् संकष्टच पूर्वविर
तुर्थीनिर्णयः मध्याह्नव्यापिनी ग्राह्या अभावे परैव तत्र मध्याह्नव्यापिनी ग्राह्या मध्या
परैव३ ह्नव्याप्त्यभावे पूर्वैव चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते मध्याह्नव्यापिनी चेत्स्या
त्परतश्चेत्परेहनी ति माधवीये बृहस्पत्युक्तेः विघ्नेशव्रते पूर्वा चंद्रोदयव्यापिनी स्याच्चतुर्थी संकष्टव्रते परयु
तानदा कार्या च तुर्थी शुभकांक्षिभिरिति व्रतकमलाकरोक्तेः संकष्टचतुर्थी चंद्रोदयव्यापिनी स्याच्चतुर्थी
सर्वदा परे ति संग्रहोक्तेश्च चंद्रोदयेयदा न स्याच्चतुर्थी या दिनद्वये प्रदोषव्यापिनी ग्राह्या च
तुर्थी या विधोदये परे त्र्यवतिभिः कार्या गणनाथपरायणैः इति चंद्रोदयोक्तेः अत्र च
द्रदर्शनं न कार्यं कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शने मिथ्याभिदूषणं कुर्यात् तस्मात्पश्ये ४ माधवी ४
त्तं तं सदा तद्दोषशांतये सिंहः प्रसेनमवधीदिति वैपठेदिति पराशरोक्तेः मंत्रस्तु विष्णुपुराणे वरदचतुर्थी उच्यते
सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः इति दशा वा
३ भाद्रपदशुक्ल पंचमी २ रपठेत् इति संकष्टचतुर्थी निर्णयः अथ ऋषिपंचमीव्रतं सा च मध्याह्नव्यापिनी ग्रा
ह्या पूजांतेषु चसर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये हारीतोक्तेः दिनद्वये तथा

८= तथा । मात विद्धा प्रशस्तास्याच्चतुर्थी गणनायके । मध्याह्ने परतश्चेत्स्यात् नागविद्धा प्रशस्यते माधवीये स्मृतितो स्थि॥=
= सिद्धिविनायकव्रते पि मध्याह्नव्यापिनी ग्राह्या । प्रातः शुक्ल तिले स्नात्वा मध्याह्ने पूजयेन्नृप इति हेमाद्रौ भविष्ये पूजायां सकाल
= दिनद्वये मध्याह्नव्यापित्वे परैव मातृविद्धा प्रशस्ता इति दिनद्वये तदभावे पूर्वैव माधवे यत्र तदेवरति भोमाभ्यां युक्ता चेन्महती
= च्यते तीता सावदा विशेषमाहुः तन्तरा हो तत्रेश्च ॥ अत्रापि ऐव ग्राह्यते ॥=६

Indira Gandhi National Centre for the Arts

= न तदभावे वा ॥ ३ = कश्चित् तथा पंचमी पूर्वयुता ग्राह्येति मदनरत्ने युग्मवाक्यात् अत्र कालपदास्पदमपि ग्राह्यता ॥ स्कंदपुराणे ॥ तत्र मुनिना ... पंचम्यां ...
= एवं सति सर्वाणि कल्पानि सर्वकर्मसु प्रतिपदः संप्रत्य परे हि तन्मन्त्रेण ... इति निर्ण-
= याम् तोक्तेः ॥ ३

स्मृति — तथा पंचम्याः षष्ठीयुतत्वं ... पंचमी ... प्रशस्त

का॰ चं॰ २२ सर्वत्र तु हेमाद्रिमते परा सितापक्षे तु या स्नाता पंचमी तीर्थदीपिकोक्तेः पंचम्यां षष्ठिसमन्वितमिति कथ्यते ४
पंचमीव्रते परं तत्पूजने स्नाननियमादिति दिवोदासप्रकाशोक्तेः माधवमते पूर्वा सर्वत्र पं- सूर्य ३
चमी पूर्वेति तेनोक्ते वक्ष्यमाणात् भाद्रपदशुक्लषष्ठी हलषष्ठी सप्तमी पुनेति दिवोदास ॥ तस्यां ...
इति क्वचित् पंचमीनिर्णयः अथ दूर्वाष्टमीनिर्णयः भाद्रपदशुक्लाष्टमी दूर्वाष्टमी सा पूर्वा
ग्राह्या शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् दूर्वाष्टमीति सा ज्ञेया नोत्तरा सा विधीय-
ते इति पुराणसमुच्चयाच्च अधिमासे पूर्वकार्या अधिमासे तु संप्राप्ते नभस्ये उदये पुन-
र्वी दूर्वाव्रतं कार्यं परतो नैव कुत्रचिदिति वचनात् इति दूर्वाष्टमीनिर्णयः अथ ज्येष्ठा-
ष्टमी तत्र ज्येष्ठायोगवशेन पूर्वा परा वा ग्राह्या पूर्वाह्नरात्रियोगे पूर्वैव मासि भाद्रपदे शु- राम २२
क्लपक्षे ज्येष्ठर्क्षसंयुता रात्रिर्यस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति माधवीये स्कं-
न्दोक्तेः दिनद्वययोगे परैव नवम्या सह कार्या स्यादष्टमी नात्र संशयः मासि भाद्रपदे
शुक्ले पक्षे ज्येष्ठर्क्षसंयुते तिथिमत्वको मुख्या स्कान्दोक्तेः अस्यापवादस्तन्त्रे वोक्तः
यस्मिन् दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु तस्मिन्नेव विधेया पूजा चेन्न्यूना चेत्पूर्वा

सेरेति मन्त्रे विसर्जनमनुराधायामावाहनं मन्त्रास्तु नामगेन वर्णितमिति नाममन्त्रेण वा पूजये-
दिति निर्णयसिन्धावुक्तः इति ज्येष्ठाव्रतनिर्णयः अथ वामनजयन्ती नभस्यशुक्लपक्षस्य
द्वादश्यां श्रवणेन हि वलिच्छलयन् धनं गृहीतुं मध्याह्ने वामनस्त्वभूत् जयन्ती वामनाख्यास्या-
त्सोपोष्या च नरोत्तमैः एकादश्यां भवेद्योगो द्वादश्याः श्रवणस्य च पूर्वाह्ने वाथ मध्याह्ने
सातीव शुभदा स्मृतेति निर्णयसिन्धावुक्तः द्वादशी श्रवणर्क्षं च स्पृशेदेकादशी यदि स यो-
गो दुर्लभोऽत्यन्तं विष्णुशृङ्खलसंज्ञकः प्राप्नोत्यनन्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति हेमाद्रा-
वुक्तः इति वामनजयन्तीनिर्णयः अथ श्रवणद्वादशीनिर्णयः तत्र श्रवणद्वादश्यामु-
पवासः कार्यः शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता तत्रोपवासः कर्तव्यस्तत्रोपोष्या-
नुपारणमिति दीपिकाविवरणोक्तेः एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् न तत्र वि-
धिलोपः स्यादुभयोर्देवता हरिः असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतान्तरं एकदेवं समुद्दिश्य क-
र्तव्यं नान्यथा क्वचित् इति निर्णयसिन्धावुक्तः तिथिनक्षत्रयोगो वै योगश्चैव न राधि-
प द्विकलो यदि लभ्येत संज्ञेयो ह्यष्टयामिकः एकादशी द्वादशी च विद्धासंयमपि पद्भवेत् ॥

Indira Gandhi National
Centre for the Arts

का॰ च॰ तद्दिने सुखे खलो नाम विष्णोः सायुज्यमाप्नुयात् तिथिनक्षत्रयोगे तु उपवासो भवेद्यदि पारणा
२३ नैव कर्तव्या यावन्नैकस्य संक्षयः इति नारदीयोक्तेः यस्तूपवासं द्वादश्यां कर्तुं असमर्थस्तं प्रत्या
ह एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् उपवासजं पुण्यं सर्वमाप्नोत्यसंशयमिति विष्णु
पुराणोक्तेः श्रवणद्वादश्युपवासः स्मार्त्तानामपि आवश्यक इति माधवोक्तेः अत्र सोदकुं
भं दद्यान्नं शक्त्या इति श्रवणद्वादशीनिर्णयः अथ भाद्रशुक्लचतुर्दश्यामनन्तव्रतं तत्रो
दयव्यापिनी ग्राह्या उदये त्रिमुहूर्तापि ग्राह्यानन्तव्रते तिथिः पूर्वविद्धैव कर्तव्या पूर्वाह्णे स्नानकारि
णि इति माधवोक्तेः इत्यनन्तव्रतनिर्णयः अथ पौर्णमासीनिर्णयः भाद्रपदपौर्णमा
स्यां पितामहात्परान् त्रीनुद्दिश्य नान्दीश्राद्धं कार्यं नान्दीमुखानां प्रत्यब्दं कन्याराशिगते राम
रवौ पौर्णमास्यां तु कर्तव्यं वराहवचनं यथेति हेमाद्रौ ब्राह्ममार्कण्डेयोक्तेः प्रत्यब्दमित्युक्तेः २३
पक्षश्राद्धपक्षे सकृन्महालयापरपक्षे तदावश्यकमित्युक्तं प्रयोगपारिजाते इति भाद्र
पदपौर्णमासीनिर्णयः श्रीमल्लालोपनामक कालनिर्णयचन्द्रिकायां भाद्रपदनि
र्णयः अथ कपिलाषष्ठीनिर्णयः भाद्रमास्यसिते पक्षे भानुश्चैव करे यदा पाते कुजे

चरोहिण्यां सा षष्ठी कपिला स्मृता दिवैव योगः शस्तोऽयं सूर्यपर्वशताधिकः योगः स्याद्यदि यद्रात्रौ चंद्रष
ष्ठीवसो व्यतीति इति कपिलषष्ठीनिर्णयः अथ महालयनिर्णयः तत्र पक्षश्राद्धकरणे वृश्चिकसंक्रान्त्य
वधिः कालः वृश्चिके समतिक्रान्ते पितरो दैवतैः सह निःश्वस्य प्रतिगच्छन्ति शापं दत्वा सुदारुणमिति ब्रा
ह्मात् इदमन्नेनैव कार्यं मृताहे च सपिंडं च गयाश्राद्धं महालयं आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हि
चित् इति स्मृतिदर्पणे गालवोक्तेः अत्र देवताः तातांबात्रितयं सपत्नजननी माता महादित्रयं सस्त्रि
स्त्रीतनयादि तातजननी स्वभ्रातरः सस्त्रियः तातांबात्मभगिन्यपत्यधवयुग्जाया पिता सद्गुरुः शिष्या
प्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे इति हेमाद्रौ संग्रहोक्तेः अस्यार्थः तातत्रयी अंबात्रयी
अनेकमातृकत्वे एकपिंडः सर्वानन्नुद्य अनेका मातरो यस्य श्राद्धे चापरपक्षके अर्घ्यदानं पृथक् कु
र्यात् पिंडमेकं तु निर्वपेत् इति स्मृतिदर्पणे गालवोक्तेः उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातु
लाः श्वशुरभ्रातृतनुजैः मित्रर्त्विक्शिष्ययोषकाः भगिनी स्वामी दुहितृजामातृभगिनीसुताः
पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा सखिद्रव्यदशिष्या प्राप्तार्थे चैव महालये एकोद्दिष्ट
विधानेन पूजनीयाः प्रयत्नतः इति हेमाद्र्युक्तेः अन्येषामर्थपिंडदानं पार्वणं पक्षश्राद्धाशक्तौ

Indira Gandhi National Centre for the Arts

का.च. एकस्मिन्दिने एकब्राह्मणेन वा कुर्यात् एकस्मिन्ब्राह्मणे सर्वेषां चार्घादीन्प्रकल्पयेत् दश द्वादश वा
२४ पिंडान्दद्यादकरणे न क्षतिरिति पृथ्वीचंद्रोदये चतुर्विंशतिमतोक्तेः एकोद्दिष्टस्वरूपं च एकोद्दिष्टं दैव
हीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितं त्वपसव्यवत् इति याज्ञवल्क्योक्तेः अत्रैवपा
केवैश्वदेवं तंत्रं पिंडवर्हिश्चैकं इति स्मृत्यर्थसारोक्तेः अत्र धुरिलोचनसंज्ञकौ विश्वेदेवौ सकामि
नां नो चेत्पुरूरवार्द्रवसंज्ञकौ वेति मदनरत्नोक्तेः कामे च धुरिलोचनाविति प्रयोगरत्ने पक्षश्रा
द्धं विधवा पार्वणवत्पृथक्कुर्यात् चत्वारः पार्वणोपेक्षा विधवायाः सदैव हि स्वभर्तुः श्वशुरादीनां
मातापित्रोस्तथैव चेति स्मृतिसंग्रहोक्तेः अशक्तौ पार्वणाद्यपि वा स्वभर्तृप्रभृतित्रिभ्यः स्वपितृ
भ्यस्तथैव च विधवा कारयेच्छ्राद्धं यथाकालमतंद्रितेति स्मृतिरत्नावल्योक्तेः विधवायाः स्वयं सं
कल्पं कृत्वा अन्यद्वारा कारयेदिति प्रयोगपारिजातोक्तेः अत्र पक्षमध्ये यस्मिन्कस्मिंश्चिद्दिने सकृन्म राम
हालये श्राद्धकर्तरि पिंडदानादि नान्याहगणीः नंदा शुक्रकामरव्यारभार्गवाग्निपितृकालभं गंडे वैधृ २४
तिपाते च पिंडास्त्याज्याः फलेप्सुभिरिति स्मृतिसंग्रहोक्तेश्च अस्यार्थः नंदा प्रतिपत्षष्ठ्येकादश्यः
अश्वसप्तमी कामः त्रयोदशी रविः आरो भौमः भृगुः अग्निभं कृत्तिका कालभं भरणी इति स

करण।३

कृन्महालये पिंडास्त्याज्या इत्यर्थः अत्र समूलत्वं मृग्यं सकृन्महालये च वर्ज्यानित्थ्याद्युक्तं पृथ्वीचं
द्रोदये माधवप्रयोगपारिजातादिषु वसिष्ठः नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु एषु श्रा
द्धं न कुर्वीत गृही पुत्रधनक्षयात् त्रिजन्मभं नतः पूर्वं नरेचैव त्रिजन्मनि वृद्धगार्ग्यः प्राजाप
त्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति प्राजापत्यं रोहिणी
पौष्णं रेवती पित्र्यं मघा अत्र पिंडास्त्याज्याः सुतेप्सुभिः एतच्च सकृन्महालयविशेषनद्वचनेच स
कृन्महालये काम्ये पुनःश्राद्धे विलेषु च अतीते विषये चैव सर्वमेतद्विचिंतयेदिति पृथ्वीचंद्रोदयो
क्तेः अस्यापवादो हेमाद्रौ पृथ्वीचंद्रोदये अमापाते भरण्यां च द्वादश्यां पक्षमध्यके तथा तिथिं च
नक्षत्रं वारं च न विचारयेत् पराशरमाधवीये मदनपारिजातादिषु चैव निर्णयदीपिकायां तु
पितृमृताहे निषिद्धेपि सकृन्महालयं कारयेदित्युक्तं आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे
मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः तस्य संवत्सरं यावत्तृप्ताः पितरो ध्रुवमिति नागरखंडोक्ते
श्च या तिथिर्यस्य तातस्य मृताहे तु प्रवर्तते सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः तिथिच्छे
दो न कर्तव्यो विनाशो चंपदृच्छया पिंडश्राद्धं च कर्तव्यं विच्छिन्नं नैव कारयेत् इति निर्णयदीपे धावुकेः

Indira Gandhi National
Centre for the Arts

पक्षश्राद्धाकरणेन नंदादिषु पिंडनिषेधइत्याह पराशरमाधवीये कार्ष्णाजिनिः नभस्यस्यापरेप
का·चं· क्षे श्राद्धं कार्यं दिने दिने नैव नंदादि वर्ज्यं स्यान्नैव निंद्या चतुर्दशीति अत्र श्राद्धमित्युक्तवचनादिने
२५ दिने इति वीप्सावचनादिने दिने इति वीप्सावचनाच्च सोमयागवदेकस्याभ्यासेनैकप्रयोगपरमि
दं अतः प्रतिपत्प्रभृति षष्ठ्यां वर्जयित्वा चतुर्दशीमिति याज्ञवल्कीयप्रयोगभेदपरं न तु पंचम्या
दिपक्षविषयं प्रतिपत्प्रभृति षष्ठितिथिविशिष्योक्तेः निर्णयदीपेप्येवं पृथ्वीचंद्रोदयमदनपारिजा
ते चैवं अन्यकल्पापक्षपरं याज्ञवल्कीयं एतत्परत्वेनैव निंद्या चतुर्दशी विरोधादिति गौडः तत्र
श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालयइति विरोधात् तत्वं तु तिथिवारनक्षत्रादिनिषेधोपमु
दाहृतः सश्राद्धेतन्निमित्तेस्यान्नानुषंगकृतेह्ययमिति दिवोदासीये गार्ग्योक्तेस्तन्निमित्तपक्षांत राम·
रेवतेयः सकृन्महालये तु वचनान्निषेधः कार्ष्णाजिनस्मृतिरिति अतो नंदादौ सपिंडकश्राद्धे २५
पुत्रवतोप्यधिकारः अत्रिरपि महालये क्षयाहे च दर्शे पुत्रस्य जन्मनि तीर्थे विनिर्वपेत्पिंडान्
रविवारादिकेष्वपि पूर्वोक्तनंदादिषु निषेधस्तु सकृन्महालयेपौर्णमास्यादिमृताहे श्राद्धे
न्निमित्तेचेतरेयः यत्तु स्मृत्यर्थसारे विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकं पिंडदानं मृदास्नानं न कु

र्यात्तिलतर्पणं तस्यापवादो दिवोदासीये बृहस्पतिनोक्तः तीर्थे सांवत्सरे प्रेते पितृयोगे महालये पिं
डदानं प्रकुर्वीत युगादिमरणे मघे महालये गयाश्राद्धे मातापित्रोः क्षयेहनि कृतोद्वाहोपि कुर्वीत
पिंडनिर्वपणं सदेति तदयमर्थः संपन्नषोडशाहव्यापिश्राद्धस्य न पिंडनिषेधः मृताहे सकृ
न्महालये पिना निषेधः सिद्धेति केचित् तत्रापि निषेधस्तु युक्तः प्रत्यहं श्राद्धभेदेपि व्यतीपाता
दिकेतथा अन्यत्र पिंडनिषेधइति सन्यस्तं पितृकारेण अपरपक्षिके श्राद्धेपि न च पिंडदाहि
ते वृद्धौ तीर्थे च संन्यस्ते जाते च पतिते सति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति कात्या
दुर्नपिंड यनोक्तेः मुंडदानं च प्रेतकर्म च सर्वशः न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव तीति दक्षोक्तेः
अत्र श्राद्धांगतर्पणं पक्षश्राद्धेश्राद्धांते प्रतिदिनं कार्यं सकृन्महालये चैव परेहनि तिलोदकं
पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने सकृन्महालये चैव परेहनि तिलोदकं इति नारदीयोक्तेः
इति महालयविचारनिर्णयः अथाष्टकाश्राद्धनिर्णयः अष्टम्यामेवाष्टमीमध्याद्वर्ष महालये
त्रिदिनात्मकमित्येन दशम्यत्र पराह्णगा नवमी सप्तमी संज्ञेतस्याः पार्श्वस्थिते हि ते अष्टम्यां तु
प्रधानत्वादपराह्णमिहाश्रयेत् न पक्षपार्श्ववर्तिन्योरंगत्वाद्दशमीतिथेः इतिश्राद्धकानि
न्व३

का॰ च॰ र्णयः अथ नवम्यामन्वष्टकाश्राद्धं जीवत्पितृकेणापि कार्यं आन्वष्टक्यं गयाप्राप्तौ सत्यां च मृते
२८ हनि मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति धमिनत्वक्तो मुख्या निर्णयामृतोक्तेः पितृमर
णोत्तरमपि पूर्ववन्न तु मातुः श्राद्धकार्यमेव पितृमातृकुलोत्पन्नाः याः काश्चिन्मृताः स्त्रियः श्रा
द्धाहा मातरो ज्ञेया श्राद्धं तत्र प्रदीयत इति ब्राह्मोक्तेः इति नवम्यामन्वष्टकाश्राद्धनिर्णयः
अथ महालक्ष्मीव्रतनिर्णयः महालक्ष्मीव्रतं भाद्रशुक्लाष्टम्यां चनोमले कन्यार्केनारभेदा
ष्टांसदुर्गाष्टम्यां चेम आद्यप्रथमवर्षे कृष्णाष्टम्यां पुनर्भाद्रे पूजयित्वा समापयेत् पूर्वाङ्गीस्त
काभिन्नो समाप्यन्तो जरा द्वितः चंद्रोदयगतोपोष्या षोडशाब्दमिदं व्रतं परेऽह्नि उदयादूर्ध्वं त्रिमु
हूर्तातदापरा इति महालक्ष्मीव्रतनिर्णयः प्रकृतमनुसरामः सन्यासिनो द्वादश्यां श्राद्धका
र्यं यतीनां च वनस्थानां वैष्णवानां विशेषतः द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इ राम
ति पृथ्वीचंद्रोदये संग्रहोक्तेः मघात्रयोदश्यां श्राद्धं कार्यं विभक्तो वाविभक्तो वा कुर्याच्छ्राद्धं पृथक् २८
सुताः मघासु च ततोऽन्यत्र नाधिकारः पृथग्विनेति हेमाद्रौ उक्तेः इदं च पितुरहितं मघायुक्ते
त्रयोदश्यां पितुर्निर्वपणाद्द्विजः ससंतानो नैव कुर्यादित्यन्ये कवयो विदुः इत्यपरार्कोक्तेः॥

मघात्रयोदशी महालययुगादिश्राद्धानि तंत्रेण प्रयोगेण प्रसंगात्सिद्धिरिति अन्यत्र विस्तरः इ
ति मघात्रयोदशीनिर्णयः अथ घातचतुर्दशीनिर्णयः तत्र शस्त्रादिहतानामेकोद्दिष्टं दैवयुक्तं
कार्यं अपमृत्युर्भवेत्तेषां शस्त्रमृत्युरथापि वा तेषां श्राद्धं प्रकर्तव्यं चतुर्दश्यां नराधिप ब्राह्मणान्
प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः दैवयुक्तं तत श्राद्धं पितृणां अक्षयं भवेदिति प्रयोगपा
रिजातोक्तेः अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमो न तु शस्त्रहतस्यैवेति श्राद्धं शस्त्रहतस्यैव
चतुर्दश्यामिति नियमो धर्मतत्त्वकौमुद्यां ज्ञालादर्शास्तु इति घातचतुर्दशीनिर्णयः अथ अमा
वास्यानिर्णयः हंसे वृश्चिकस्थिते पातु अमावास्या करान्विता साज्ञेया कुंजरच्छाया इति बौधायनो
ब्रवीत् वनस्पतिगते सोमे याच्छाया प्राङ्मुखी भवेत् गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं समाचरेदिति
अपरार्कोक्तेः इत्यमावास्यापरपक्षनिर्णयः अथ दौहित्रप्रतिपन्निर्णयः आश्विनशुक्लप्र
तिपद्यां दौहित्रस्य मातामहश्राद्धमुक्तं जातमात्रोपि दौहित्रो जीवत्यपि च मातुले कुर्यान्माताम
हश्राद्धं प्रतिपद्याश्विने सित इति हेमाद्रौ संग्रहात् इदं च संगवव्यापिनी ग्राह्येति निर्णयदी
पिकोक्तेः प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं श्राद्धं मातामहं कुर्यात्सपितापि संगवे सदेति

विद्यमाने ३

Indira Gandhi National
Centre for the Arts

का॰चं॰ जातमात्रेपिदौहित्रेजीवत्यपिचमातुले प्रातःसंगवयोर्मध्येश्राद्धंस्यप्रतिपद्भवेत् इतिवचोभ्यांचेत्
३७ अत्रसमूलत्वंमृग्यमितिनिर्णयसिंधावुक्तेः इदंचपराह्ण एवकार्यं मलमासेचेदन्नकार्यं स्पष्ट
मासिविशेषास्यविहितंवर्जयेन्मलेतिनिषेधात् इदंजीवत्पितृकेणापिकार्यमितिशिष्टाः इदंचशि
ष्टाचारात्सपिंडकार्यंइतिकेचित् वस्तुतस्तुपिंडरहितंयुक्तं मुंडनंपिंडदानंचप्रेतकर्मचेतिदक्षिण
पिंडनिषेधात् अनष्टकाद्विशेषवचनाभावेचेतिसंक्षेपः॥ ॥इतिदौहित्रप्रतिपन्निर्णयः॥
इतिश्रीमत्कालोपनामक॰ कालनिर्णयचंद्रिकायांमहालयांतभाद्रपदमासनिर्णयः॥ ॥अथा
श्विनमासः तत्रवर्षेवर्षेविधातव्यंस्थापनंचविसर्जनमितिदेवीपुराणेवीप्साश्रवणात् योमो
हादथवालस्याद्देवींदुर्गांमहोत्सवे नपूजयतिपापात्मारोगाद्यप्ययभैरवात् क्रुद्धाभगवतीत रा॰म॰
स्यकामानिष्टान्निहंतिचेतिकालिकापुराणे कृत्यप्रत्यवायश्रवणाच्च पूजायानित्यत्वं इदं ३७
चव्रतंआश्विनशुक्लप्रतिपदमारभ्य तद्दशमीमहानवमीपर्यंतंकार्यमितिमुख्यःकल्पः कन्यासं
स्थरवौशक्रशुक्लामारभ्यनंदिकामित्यारभ्यमहानवम्यांपूजयं स्वर्गमोक्षप्रदायिनीत्यंतादे
वीपुराणात् मासिचाश्वयुजेशुक्लेनवरात्रेविशेषतः संपूज्यनवदुर्गांचनक्तंकुर्यात्समाहितः॥

इत्यादिवाक्याच्च नवरात्रशब्दस्त्रिशदस्यअहोरात्रःपरस्यतिथिविषयपर्ववाच्यतयातिथिलक्षणत्वा
त्सप्तम्यतः प्रतिपदादिनवतिथिरूपगुणविधिः ननुनामधेयंवाक्यांतरेणप्रवृत्तिनिमित्तभूतकालसंबंधस्य
त्वविधानेनतत्प्रख्यान्यायाभावात् षष्ठ्यादिषुसप्तम्यादिपक्षावपिकालिकाभविष्यपुराणयोरुक्तौ नेहलि
ख्यतेविस्तरभीतेः ॰नवप्रारंभतिथेःखंडत्वेगौडनिबंधेषु पूर्वाह्णेनवपत्रिकादिशुभकरी सर्वार्थसिद्धिप्रदे
तिमूलानुरोधात् प्रातरावाहयेद्देवीं प्रातरेवप्रवेशयेत् प्रातःप्रातश्चसंपूज्यप्रातरेवविसर्जयेत् इतिभ
विष्योत्तरात् प्रातःशब्दस्यपूर्वाह्णपरत्वा पूर्वाह्णस्यपूजाकालत्वेनोक्तेः तद्व्याप्तौचतिथिनिर्णयःकृतः
यातुषष्टिदंडात्मकाभूत्वापरदिनेत्रिमुहूर्तापिसापूर्वाग्राह्या आदित्योदयवेलायांआरभ्यषष्टिनाडिका
तिथिस्तुसाहिशुद्धास्यात्सर्वतिथ्योप्ययंविधिरितिनारदीयात् दाक्षिणात्यनिबंधेष्वपिपूर्वविद्धानि
षेधकोत्तरविद्धाविधायकवचनेभ्यः कर्मणोयस्ययःकालः तत्कालव्यापिनीतिथिरितिसामान्यवचना
च्चखंडाप्रतिपद्द्वितीयाविद्धैवग्राह्येत्युक्तं कालतत्त्वविवेचनेरघुनाथयज्वपिनस्तुमाध्यवहे
माद्यादिभिर्नवरात्रस्यनक्तव्रतस्यनक्तव्रतत्वोक्तेः आश्विनेमासिसुदिनेप्रतिपद्यातिथिर्भवे
त् नक्तंतस्यांप्रकुर्वीतरात्रौदेवींप्रपूजयेत् तथा मासिचाश्वयुजेशुक्लेनवरात्रेविशेषतः संपूज्य

Indira Gandhi National
Centre for the Arts

का॰ चं॰ २८ नवदुर्गार्चनमंकुर्यात्समाहितः तथा रात्रिव्रतमिदं तस्य रात्रौ कर्त्तव्यतेष्यत इति देवीपुराणादिति वच
नेभ्यः द्वितीयाविद्धविधायकवचनानां माधवादिरस्ति मत्वा च प्रधानपूजस्य प्रदोषकालस्य अंगी
कृत्य निर्णयं प्राहुः तथाहि दिनद्वयेऽप्यस्तमयात्पूर्वं समाप्त्या पूर्वदिन एव व्याप्त्या एकदेशेन काल
योगे पूर्वैव ग्राह्या नक्तव्रतेषु सर्वेषु रात्रियोगः प्रशस्यते इति वचनात् प्रतिपदाप्यमावास्येति युग्मवा
क्याच्च पूर्वदिने दिवापि सत्वे सुतरां पूर्वा न च आद्यास्तु नाडिकास्त्याज्याः षोडश द्वादशापि चेति वाक्य
विहितनाडीत्यागानुपपत्तिः प्रदोषे पूजोपक्रमादिति वाच्यं आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते
नरः कलशस्थापनं तत्र अरिष्टं जायते ध्रुवमिति वचने कुवाक्यतया कलशस्थापनविषयत्वा दि
नद्वये प्रदोषव्याप्त्यभावे गौणकालव्याप्तिसत्वात् नक्तव्रतेषु सर्वेषु रात्रियोगः प्रशस्यत इति वचना
च्च पूर्वैवेति यद्यपि प्रतिभाति तथापि माधवादिभिर्नक्तव्रतत्वमात्राभिधानात् विशेषानभिधानात्त राम॰ २८
त्कल्पपूर्वाह्णमध्याह्न पूजाकालव्याप्तिलाभादपश्च बहवो गुणा उत्तरस्यामिति सैव गृह्यते उत्तरैव द
ष्टिक्रियेन प्रतिपद्याश्विने कार्यं नवरात्रं क्रमाद्बुधैः अन्त्या युक्ता न कर्त्तव्या नाशयत्त्कुलं यत इति देवी
पुराणाच्च तथाच नदर्शकलया युक्ता प्रतिपच्चंडिकार्चने उदये द्विमुहूर्त्तापि ग्राह्या सैवापरेहनीति

भविष्योक्तेः तिस्रो ह्येताः पराः प्रोक्तास्तिथयः कुरुनंदन कार्त्तिकाश्वयुजे माघि चैत्रे प्रतिपदः शुभाः
इति महाभारते हेमाद्रौ ब्राह्मोक्तेः पराः परयुताः शुभाः शुक्ला इत्यर्थः तथाच अमायुक्ता न कर्त्तव्या प्र
तिपत्पूजने मम मुहूर्त्तमात्रा कर्त्तव्या द्वितीयासहिता सदेति देवीपुराणे देवीवचनोक्तेः प्रतिपत्स्वल्प
मात्रापि यदि न स्यात्परेहनि अमायुक्ता तदा कार्या त्यक्त्वा षोडश नाडिकाः स्वल्पापि प्रतिपद्ग्राह्या चि
त्रावैधृतिवर्जितेति देवीपुराणात् तथाच वैधृतिव्याघ्रयोगेपि संक्रमे च विशेषतः चंद्रकादियोगे
पि परान्हे चंडिकां यजेदिति भार्गवार्चनदीपिकायां देवीपुराणे देवीवचोक्तेः सर्वदोषेपि द्वितीया
युता प्रशस्ता मूलान्विता चेत्प्रतिपत्तु लभ्यते विरुद्धयोगैरपि संगता सती सैवापरा दैव विबुध्यैर्विधे
यास्त्रीषु च राज्यादिविवृद्धिहेतुरिति दुर्गोत्सवतत्वोक्तेः अथाशौचपाते निर्णयः तद्यथा शावा
सूतेसमुत्पन्ने क्रिया कार्या कथं बुधैरिति प्रश्ने तत्रोत्तरमाह संग्रहे व्रतयज्ञविवाहेषु श्राद्धे होमार्च
ने जपे प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीश्राद्ध
विवाहादौ श्राद्धे पाकपरिक्रिया इति दीपिकोक्तेः प्रारंभावपि बृहस्पतिना दर्शितौ देवीपूजाप्रवृत्तेर्या
मंत्रैर्यत्त्विधानतः इति तथाच सूतके पूजनं प्रोक्तं दानं चैव विशेषतः देवीमुद्दिश्य कर्त्तव्यं न

Indira Gandhi National
Centre for the Arts

का॰ चं॰
२९

अथ सरस्वती स्थापन निर्णयः ॥ मूलाद्यपादगी: स्थाप्या पूर्वाषाढसु पूजनं उत्तरासु बलिं दद्याच्छ्रवणान्त्ये विसर्जयेदिति निर्णय सिंधावुक्तेः ॥ इति सरस्वती स्थापन निर्णयः ॥ अथाष्टमी निर्णयः सच महाष्टमी नवमीयुक्ता ग्राह्या ॥ नवमी चाष्टमीविद्धा अष्टमी नवमीयुते त्रिमुख वाक्यात्

त्रदोषो न विद्यते इति निर्णयामृते भविष्योक्तेः अन्यद्वारा वा कार्यं कारयितव्यमन्येन देव्याः पूजादिकं
चयत् नत्यजेत्पूजनं देव्याः कारयेदग्निहोत्रवत् इति विष्णूक्तेः सर्वथा कर्तव्यमित्यर्थः इति सूतका
दिनिर्णय पूर्वकं घटस्थापनादि निर्णयः अथोपांगललिता निर्णयः आश्विन शुक्ल पंचम्यामुपां
गललिता निर्णयः आश्विन शुक्ल पंचम्यामुपांगललिताव्रतं इति इदं महाराष्ट्र देशे प्रसिद्धं तत्र
रात्रयोगिनी ग्राह्या कुंभ्या जागरणेन नक्तं चंद्रार्घ्यव्रतं तथा तारा व्रते प्रसर्वे सुरात्रियोगः प्रशस्यत इति
हेमाद्रावुक्तेः तथा दिनद्वयव्याप्तौ पूर्वैव ग्राह्या रात्रिशब्दः पूर्वविद्धावचन इति हेमाद्रिः अस्य च
मुख्या जागरणे हूपादि तिसायुपृतीमः इत्युपांगललिता व्रत निर्णयः अष्टम्यामारभेद्धोमं नव
म्यां च समापयेत् नवम्यामारभे द्धोमं नवम्यां वे समापयेदिति निर्णयसिंधावुक्तेः अथ नवरा
त्र पारण निर्णयः स च दशम्यां कार्या आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं प्रतिपदाक्रमेण
चैव यावच्च दशमी भवेत् त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति हेमाद्रौ धौम्य वचनात् नव
मीतिथि पर्यंतं वृध्या पूजा जपादिकमिति प्रागुक्त वचनेन नवनवमी पर्यंतं प्रधान भूते पूजाद्युक्ते
रुपवासादेश्चांगत्वेन तत्पर्यंतत्वात् आदिशब्देनोपवासोक्तेः पूर्वोक्त त्रिरात्रव्रतेन नवम्यामुपो
ष्यत्वाच्च न च पारणांतत्वेन त्रिरात्रत्वं विष्णुत्रिरात्रादौ तथा प्रसक्तेः न चात्रोपवासे मानाभाव इति वा
च्यं एवं च विंध्यवासिन्यां नवरात्रोपवासतः एकभक्तेन नक्तेन तथैवायाचितेन च पूजनीया जनैर्दे
वी स्थाने स्थाने पुरे पुरे इति हेमाद्रौ भविष्योक्तेः नवरात्रः समाख्यातो नवम्यामप्युपोष्यत्वाच्च ननु
तिथिह्रासे कथमुपवासा भवंति इति कथं समाख्यानेन कर्म विशेषेण नवरात्रशब्दो रूढः अत्रैवोक्तं
देवीपुराणे तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकमिति चेत् न तिथिह्रासेपि नवतिथीनामु
पोष्यत्वान्नवरात्राक्षतेः एतेन नवरात्री णां प्राधान्यात् ह्रासे ह्रासे समापनं वत्वमिति मूर्खोक्तिः
परास्ता यत्तु देवीपुराणे कन्या संस्थे रवौ शक्र शुक्ला मारभ्य नंदिकां अयाची त्वथवैकाशी न
क्ताशी वाथवा प्ववद् इति व्रत चतुष्टयमुक्तं लोहाभिसारिकं विषयं जयाभिलाषी नृपतिः प्रतिप
त्प्रभृति क्रमात् लोहाभिसारिकं कर्म कार्यं चेद्यावदष्टमी ति भविष्येष्टमी पर्यंतमेवोक्तेः नारायणे
ननु नंदादि [illegible] प्रयोगे पृथग्वोक्तं तस्मान्नवम्यां पारणमुक्तं यद्यपि निर्णय दीपे आश्विन शु
क्लपक्षे तु नवरात्रमुपोषितः नवम्यां पारणं कुर्याद्दशमी मिश्रिता न चेत् दशमी मिश्रिता पत्र पार
णा नवमी भवेत् दुःख दारिद्र्य दातेयात या व्रत विनाशिनी ति ब्रह्म ह नाम्ना लिखितं वचनं यच्च

रामः
२९

सुते त्रिमुख वाक्यात् सामहानवमी त अवेवस्थाद्ध्या पूजने कार्या इति हेमाद्रिः इति महाष्टमी निर्णयः अथ महानवमी निर्णयः अश्वयुक्शुक्ल नवमी याष्टमी मूल संयुता सा महानवमी [illegible] दुर्गाद्या कौ चातिदुर्लभा तथा कन्यानवमी प्रोक्ता हरस्यातिप्रियानवमी द्वयोरेकौ महापुण्यं उमा माहेश्वरी तिथिरिति देवीपुराणोक्तेः अथ महानवमी [illegible] दुर्गा नवमी पूर्वोक्त वचनेन पूर्वविद्धैवेत्यर्थः अष्टमी नवमी विद्धा कर्तव्या फलकांक्षिभिः नकुर्यात् [illegible] तिथिवेधे नीत

का॰ चं॰ रुद्रयामले इति वदंति अष्टम्यां सह कार्या स्यान्नवमी पारणादिने यो मोहाद्दशमीवेधे नवम्यां चं
३० डिकां यजेत् पारणं च प्रकुर्याद्वै तस्य पुण्यं निरर्थकं नवम्यां पारणे देवी कुलवृद्धिं प्रयच्छति दशम्यां
पारणाद्देवी कुलनाशं करोति वै तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिपेत्यादीनि वचनानि
परिस्तमूलानि तदालोहाभिसारिकादीनि नंदादिव्रतचतुष्टयविषयाणि तस्याष्टमीपर्यंत एवो
क्तत्वादित्युक्तं प्राक् अन्यथा महाष्टम्यां परविद्धायां पारणाविधानपूर्वनिर्णयो विरोधो दुर्वारः स्या
त् यानि तु यैः कैश्चिदपि लिखितानि नवम्यां पारणविधायकानि वचनानि तानि सर्वाणि हे
माद्र्यादिमहानिबंधाविरुद्धत्वान्निर्मूलानि क्वचित्समूलत्वमपि यद्यदिनद्वये नवमी तदा द्वि
तीयदिनोपोष्यतिथ्यंते पारणा नि किंतु नवमीमध्ये कार्यमित्येवं नेयानि शिवरात्रिपारणावत् त्रे
धापारणाहे सूतकनिर्णयः प्राप्तो निर्णयः अत्र केचित्पारणाहे सूतकप्राप्तौ तदतिक्रम्य पार राम॰
णं कुर्यादित्याहुः काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जि ३०
तमिति माधवीये कौर्मोक्तेः व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे प्रारब्धे सूतकं न स्यादनार
ब्धे तु सूतकमिति विष्णुवचनाच्च शौचमध्येपि तावता निः पारणांतत्वाद्व्रतस्य प्रारंभस्तु नेने यो

क्तः प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति रुद्रयामलेपि सू
तके पारणं कुर्यान्नवम्यां होमपूर्वकं तदंते भोजयेद्विप्रान् दानं दद्याच्च शक्तित इति तदंते सूतकांते इ
त्यर्थः एवं त्रिभिरपि रजोदर्शनमध्ये कृत्यमेव पारणं संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतं इति
माधवीये ऋष्यश्रृंगवचनात् द्वादशीव्रतमित्युपलक्षणं प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्
न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति तत्रैव सत्यव्रतवचनात् किंच एकादश्यादौ शावाशौचप्रा
प्ते मासांतपारणापत्तिः मासोपवासांते यं च दृष्टाशौचपतितो व्रतनाशं भवेत् यत्तु नियमस्था
यदा नारी प्रपश्येदार्तवं रजः उपोष्य वतु ता रात्रीः स्नात्वा शेषं चरेद्व्रतं इति तद्दीर्घोपवासविष समर्पयेत् ६
यं तासां तत्र भोजननिषेधादिति केचित् वयं तु प्रागुक्तसत्यव्रतवचने दीर्घतपसामिति विशेषणो
पादानाद्द्वादशीव्यतिरिक्तस्वल्पैकाहोपवासविषयोयं निषेधः त्रिरात्रं नवरात्रादिति प्रसिद्ध
अयमेव निर्णयः सर्वव्रतेषु बोध्यः इति नवरात्रनिर्णयः अथ विजयादशमीनिर्णयः ॥ सा
च द्वितीयदिने श्रवणायोगाभावे पूर्वा ग्राह्या दशम्यां तु नरैः सम्यक् पूजनीयापराजिता
ऐशानीं दिशमाश्रित्य अपराह्ने प्रयत्नतः या पूर्णा नवमीयुक्ता तस्यां पूज्यापराजिता क्षेमा

Indira Gandhi National
Centre for the Arts

का॰ चं॰ ध्विजयार्थं च पूर्वोक्तविधिना नरैः नवमीशेषयुक्तायां दशम्यामपराजिता ददाति विजयं देवी पू
३१ जिता जयवर्द्धिनी तथा आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः एकादश्यां न कुर्वीत
पूजनं चापराजितमिति हेमाद्रौ स्कांदोक्तेः यदा तु पूर्वदिने श्रवणयोगाभावः परदिने चाल्पा
पि तद्योगिनी तदा परैव उदये दशमी किंचित्संपूर्णैकादशी यदि श्रवणर्क्षं यदा काले सा तिथि
क्षे५ र्विजयाभिधा श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः उल्लंघयेयुः सीमानं तद्दिनर्क्षे
ततो नरा इति हेमाद्रौ व्रतकांडे कश्यपोक्तेः काले पराह्णे परदिने पराह्णे श्रवणाभावे तु सर्व
पक्षे पूर्वैव मदनरत्नेप्येवं ज्योतिर्निबंधे रत्नकोशे नारदः ईषत्संध्यामतिक्रांतः किंचि
दुद्भिन्नतारकः विजयो नाम कालोयं सर्वकामार्थसिद्धिदः इत्यस्यां नवमीयुक्ता पूर्वविज्ञान
कारयेत् श्रवणेनापि संयुक्ता राज्ञां चाभिषेचने सूर्योदये परा राजन् दृश्यते दशमी तिथिः राम
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः अत्रायं निर्गलितोर्थः अपराह्णो मुख्यका ३१
लः तत्रैव पूजाद्युक्तेः प्रदोषो गौणः तत्र दिनद्वये अपराह्णव्याप्तित्वे पूर्वा प्रदोषव्याप्ते
राधिक्यात् दिनद्वये प्रदोषव्याप्तित्वे परा अपराह्णव्याप्तेराधिक्यात् श्रवणस्तु रोहिणी

वत्प्रयोजकः दिनद्वये पूर्वाह्णस्पर्शे पूर्वा तत्रापि परदिने अपराह्णे श्रवणसत्त्वे परैवेति
दिक् तद्दिने स्वजनैः कुर्यात्तैलाभ्यंगो महोत्सवः अश्वानामपि कर्तव्यः सर्वथा जयकांक्षिभिः अत्र
कृत्यविशेषो भार्गवार्चनदीपिकायां भविष्ये शमीयुक्तं जगन्नाथं भक्तानामभयंकरं अर्चयि
त्वा शमीवृक्षे अर्चयेच्च ततः पुनः शमीमंत्रस्तु हेमाद्रौ गोपथब्राह्मणे अमंगलानां शमनीं श
मनीं दुष्कृतस्य च दुःस्वप्ननाशनीं धन्यां प्रपद्येहं शमीं प्रभो एतदाह भविष्ये शमी शमयते पापं श
मी लोहितकंटका धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी करिष्यमाणयात्रायां यथाकालसुखा
वहं तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते तथा गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं
ए गीतवादित्रनिर्घोषैर्नयेत्स्वगृहं प्रति इति विजयादशमीनिर्णयः अथाश्विनपौर्णमासी प
रा ग्राह्या सावित्रीव्रतमंतरेण भवतौ पौर्णमास्योपरेति दीपिकोक्तेः अत्र विशेषः आश्विने पौ
र्णमास्यां तु चरेज्जागरणं निशि कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं सुगंधिर्निशि सद्वे
षो अक्षैर्जागरणं चरेत् तथा निशीथे वरदा लक्ष्मीर्जागर्तिभाषिणी तस्मै वित्तं प्रयच्छामि अक्षैः



Indira Gandhi National
Centre for the Arts

का॰चं॰ क्रीडां कुर्वीत यः इति तिथितत्त्वलिंगपोक्तेः अत्रैवाश्वयुजी कर्मणुक्तं तच्छेषपर्वणि क्वापि विकृतित्वा
३२ त् आग्रयणं पर्वणि क्वापि सर्वपाकरणं प्रापश्चित्तमुक्तं आश्विधाने इंद्राग्न्या मंत्रं च वर्षे वर्षे ज
पेच्छ्रुतं आग्रयणं यदा भून्यं तदा सपूर्णामे तिनदिति एतच्च यदि मलमासे पि कार्यमन्यथा नि
र्णयसिंधावुक्तेः इति श्रीमत्कालोपनामक काल निर्णयचंद्रिकायां आश्विनमासकृत्यनि
र्णयः अथ कार्तिकमासः तुलासंक्रमे प्राक् परा दश घटिकाः पुण्याः रात्रौ तु प्रागेवोक्तं अथ
कार्तिकस्नानं प्रारभ्यैकादश्यां शुक्लमाश्विनस्य तु मानवः प्रातः स्नानं प्रकुर्वीत यावत्का
र्तिकमासक इति भार्गवार्चनचंद्रिकायां विष्णुरहस्योक्तेः पूर्णाश्वयुजे मासि पौर्णमास्यां समा
प्ति इत्युक्त्वा मासं समग्रं परया च भक्त्या समाप्यते कार्तिकपौर्णमास्यामित्यनेन मिथानाच्चाश्वि
न शुक्लैकादश्यां पौर्णमास्यां वा आरभ्य कार्तिकशुक्लैकादश्यां पौर्णमास्यां वा समापयेदिति एम॰ ३२
हेमाद्रावादित्यपुराणवचनात् इदं च प्रातः स्नानं संध्यां च कृत्वा कार्यमिति चिंतामणिकृ
र इति वक्षीपनः यद्यपि संध्यापास्त्योदये समाप्तिस्तथापि वचनबलादनुदितहोमपक्षो वा
प्रातः

भविष्यति स्नानमंत्रस्तत्रैव कार्तिकेहं करिष्यामि प्रातः स्नानं जनार्दन प्रीत्यर्थं तव देवेश दा
मोदर मया सह इमं मंत्रं समुच्चार्य मौनी स्नायात्समाहित इति अर्घ्यमंत्रोपि तत्रैव व्रतिनः का
र्तिके मासि स्नानस्य विधिवन्मम गृहाणार्घ्यं मयादत्तं दनुजेंद्रनिषूदन नित्ये नैमित्तिके कृ
ष्ण कार्तिके पापनाशने गृहाणार्घ्यं मया दत्तं राधया सहितो हरे इति एवं संपूर्णस्नानाशक्तौ त्र्य
हं स्नायात् त्रयोदश्यां चतुर्दश्यां पौर्णमास्यां चेति ततो धात्रिमूले तुलस्यास्तहराधादा
मोदरोद्देशेन राधादामोदरपूजां तुलसीवने च कृत्वा तुलसीपत्रैर्नानाविधैः पुष्पैर्धात्रीपूजां च
कृत्वा तस्य च्छायायां पित्रोद्देशे पिंडदानेन राधादामोदरोद्देशेन सुवासिनीब्राह्मणान्भोजयेत्
विशेषदंपतीभोजनं कार्यं सुवासिनीब्राह्मणान्भोजयेत् एवं प्रत्यहं कुर्यादिति ब्राह्मोक्तेः
अथाकाशदीपः तुलायां तिलतैलेन सायंकाले समागते आकाशदीपं यो दद्यान्मासमेकं हरिं
प्रति महतीं श्रियमाप्नोति रूपसौभाग्यसंपदमिति निर्णयामृते पुष्करपुराणोक्तेः अत्र दि
दलव्रतं कुर्यात् तच्च सम्यग्द्विदलं त्यजेदिति स्मृत्यर्थसारोक्तेः कार्तिकस्य चतुर्मासव्रतपी
साचेद्द्रोदये ग्राह्या दिनद्वये तथा सत्त्वे तु प्रथमवाक्यात्पूर्वैव कार्तिकस्य द्वादशी गोवत्सं संज्ञा
Indira Gandhi National
Centre for the Arts

का॰चं॰ ३३ प्रदोषव्यापिनी ग्राह्या दिनद्वये तथात्वे तु पूर्वैव युग्मवाक्यात् वत्सपूजा वटश्चैव कर्तव्या प्रथमेऽह
नीति निर्णयामृते विधानाच्च तद्दिने तैलपक्वं च स्थालीपाकं युधिष्ठिर गोक्षीरं गोघृतं चैव दधि
तक्रं च वर्जयेत् ज्योतिर्निबंधे नारदः आश्विने शुक्लपक्षे तु द्वादश्यादिषु पंचसु तिथिषूक्तः स
विरात्रे नराणां नीराजनाविधिः नीराजयेयुर्देवांस्तु विप्रान् गाश्च तुरंगमान् ज्येष्ठान् श्रेष्ठान् जघ
न्यांश्च मातृमुख्याश्च योषित इति निर्णयामृते स्कांदोक्तेः कार्त्तिकस्यासिते पक्षे त्रयोदश्यां निशा
मुखे यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति इति निर्णयामृते स्कांदोक्तेः मंत्रस्तु मृत्युना
पाशदंडाभ्यां कालेन श्यामया सह त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतां मम इति अथ नरकच
तुर्दश्यां तैलाभ्यंगादि निर्णयः तत्र प्रभाते चंद्रोदये तैलाभ्यंगं कुर्यात् कार्त्तिके कृष्णपक्षे तु च
तुर्दश्यामिनोदये इनः सूर्यः अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिरिति हेमाद्र्युक्तेः दिनद्व
ये चंद्रोदये चतुर्दशीसत्त्वे तदभावे वारुणोदये सत्पूर्णोऽखंडे वा दिनद्वये चतुर्दशीसत्त्वे च पूर्वदि राम ३३
नेऽभ्यंगं कुर्यात् पूर्वविद्धा चतुर्दश्यामिति वचनात् दिनद्वयसत्त्वे अरुणोदयव्यापिनी ग्रा
ह्या पक्षे प्रत्यूषसमयं तु उक्तेः पूर्वदिन एव परदिन एव वा सत्त्वे सैव ग्राह्या अरुणोदयव्यापि

त्वाभावे चतुर्दशीह्रासे पूर्वेद्युः प्रवेश्य पूर्वे निहत्र योदशीमध्य एवाभ्यंगं कुर्यादिति दिवोदासः अत्र
तैलाभ्यंगे फलविशेषो भविष्ये तैले लक्ष्मीर्जले गंगा दिवाचात्या चतुर्दशी अलक्ष्मीपरिहा
रार्थं अभ्यंगस्नानमाचरेदिति वीप्साश्रुतेः अकुर्वाणः प्रत्यवायस्तु पद्मपुराणे आश्विनस्यासि
ते पक्षे चतुर्दश्यां विधूदये तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते इति निर्णयसिंधौ पाद्मोक्तेः
तांबूलचर्वणं कृत्वाभ्यंगं कुर्यात् तत्र स्नानमंत्रः सीतालोष्ठसमायुक्त सकंटकदलान्वि
त हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति पुराणांतरात् तद्दिने नित्यक्रियां विधाय यम
तर्पणं कार्यं इति नरकचतुर्दशी निर्णयः अथ दीपोत्सवनिर्णयः अमावास्यामाश्विनमासि पितॄ
कृत्यं विधाय तत्र नीराजनं द्वितीये निशायां दीपान्प्रदीपयेत् दीपान्कृत्वा प्रदोषे तु लक्ष्मीं संपूज्य न्दे५
यत्नत इति हेमाद्रौ भविष्ये दिनद्वये तथात्वे परा एव व्यापिनी ग्राह्या तुलासंस्थे सहस्रां
शौ प्रदोषे भूतदर्शयोः उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति ज्योतिःशास्त्रोक्तेः इ
त्यमावास्याकृत्यं अथ प्रतिपदा निर्णयः प्रतिपदा परविद्धा त्याज्या सा पूजने गवां नीराज
ने तस्या अभ्यंगे दर्शविद्धा परित्यजेत् भविष्ये प्रतिपत्पूर्वविद्धा त्याज्या इति भविष्योक्तेः अत्रा

Indira Gandhi National
Centre for the Arts

का·चं· भ्यंगो नित्यः मुहूर्तमात्रसत्त्वेपि प्रतिपत्का निर्णिते उत्सवादिषु कर्तव्या सर्वदा शुभकांक्षि
३४ भिरितिसमाख्यामुक्तेश्च अस्यामेव सायं कार्तिकशुक्लप्रतिपदि गोक्रीडनमुक्तं निर्ण
यामृते अस्यामेव रात्रौ बलिपूजोक्ता हेमाद्रौ भविष्ये इयं पूर्वविद्धा ग्राह्या पूर्वविद्धा प्रकर्त
व्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः अत्राभ्यंगो नित्यः बलिराज्ये तु प्रागेवो
क्तेः रात्रौ शुभे मंडपे पंचरंगकैर्बलिराजानं समालिख्य पूजयेत् मंत्रस्तु पाद्मे बलिराज
नमस्तुभ्यं दैत्यदानववंदित इंद्रशत्रोमराराते विष्णुसान्निध्यदो भवेति इति हेमाद्रावुक्तेः॥
ततो नीराजनं कार्यं सायं मंगलमालिका दीपैर्नीराजनादत्र सैषा दीपावली स्मृता दीपाव
तवा लीति सा प्रोक्ता भूतादिनत्रयक्रमात् इति मात्स्योक्तेः अत्रैव प्रातः गोवर्द्धनो गोमयेनात्रै रामः
व कृत्वा तथा मार्गपालीं च कृत्वा पूजयेत् इति हेमाद्रौ निर्णयामृते स्कांदोक्तेः गोवर्द्धनध ३४
एा३ राधार गोकुलत्राणकारक बहुबाहुकृतच्छाय गवां कोटिप्रदो भव गोमंत्रस्तु तत्रैव लक्ष्मीर्या
लोकपालानां धेनुरूपेण संस्थिता घृतं वहति यज्ञार्थे मम पापं व्यपोहतु मार्गपालीमंत्रो
स्कांदे मार्गपालि नमस्तुभ्यं सर्वलोकसुखप्रदे विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे नीराज

नं ततः कार्यं सर्वरोगजयप्रदं इति प्रतिपन्निर्णयः अथ यमद्वितीयानिर्णयः इयं प्रतिपद्युताग्रा
ह्या निर्णयामृतादौ यमद्वितीया मध्याह्नव्यापिनी पूर्वविद्धा चेति हेमाद्रिः अत्रापराह्णे य
मं संपूज्य तर्पयेदिति हेमाद्रावुक्तेः अत्र कृत्यविशेषः स्कांदे उदये द्यूतक्रीडायां पार्वत्या शं
प्रि४ करो तद्दिने ब्राह्मोक्तेः प्रतिपद्विजयो यस्य तस्य संवत्सरो जय इति तत्रैवोक्तेः मार्कंडेयस्य चि
रंजीविनश्च भ्रात्रा पूर्वं गृहे भगिनीभिः स्वमंगलार्थं पतेन स्कांदे कार्तिके शुक्लपक्षस्य द्वितीया
यां युधिष्ठिर यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रु
ता अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं दाना
नि च प्रदेयानि भगिनीभ्यो विधानतः स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः सर्वाभ
गिन्यः संपूज्या अभावे प्रतिपन्नकाः प्रतिपन्नकाप्रतिनिधि भगिन्य इति हेमाद्रिः पातु
भोजयते नारी भ्रातरं युग्मके तिथौ अर्चयेच्चापि तां वस्त्रैर्नासौ वैधव्यमाप्नुयात् भ्रातुरायु
ष्यहानिर्न भावे तत्र कर्हिचित् इति स्वभगिनी भिन्नोदरा भगिनी राजन्वत्या
लक्ष्म्याद्यर्चनपूर्वकं भोज्या इति इति यमद्वितीयानिर्णयः कार्तिकशुक्लैकादश्यां

Indira Gandhi National Centre for the Arts

का०चं ३५

मारभेद्भीष्मपंचकमिति नारदीयोक्तेः पाद्मे पंचाहः पंचगव्याशी भीष्मायार्घ्यं च पंचसु अहस्सु
तितथाद्द्यान्मंत्रेणानेन सुव्रत यस्य व्रतादय भुवये गांगेयाय महात्मने भीष्मायेतद्ददाम्यर्घ्यं
आजन्म ब्रह्मचारिणे वैयाघ्रपादगोत्राय तित्यसेनानेन मंत्रेण तर्पणं सार्ववर्णिकमिति॥
कार्तिकशुक्लद्वादश्यां रेवतीनक्षत्रअंत्यपादयोगरहितायां पारणं कार्यं अस्यामेव रात्रौ देवो
त्थापनं कार्यं इति हेमाद्रौ ब्राह्मोक्तेः महापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः उत्थापनमंत्रस्तु
वाराहपुराणे ब्रह्मेशरुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय बुध्यस्व देवेश जगन्नि
वासमंत्रप्रभावेन सुखेन देव इयंतु द्वादशी देवप्रबोधार्थं विनिर्मिता त्वयैव सर्वलोकानां
हितार्थं शेषशायिना उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते त्वयि सुप्ते जगन्नाथ जग राम
त्सुप्तं भवेदिदं उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव गतामेघा वियच्चैव निर्मलं निर्म ३५
लादिशः शारदानि च पुष्पाणि गृहाण मम केशव इद विष्णुरिति प्रोक्तमंत्रउत्थापनेहरेरिति
चातुर्मास्यव्रतसमापनमंत्रस्तु निर्णयामृते सनत्कुमारेणोक्तः इदं व्रतं मया देव कृतं प्री
त्यै तव प्रभो न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति ततो ब्राह्मणान्संपूज्य दक्षिणां दत्वा

शिषोगृह्णीयादिति ब्राह्मोक्तेः इदं च शुक्लत्वादावपि कार्यं आशौचे आशौचे तु पूजां कारयेत् इत्युत्था
पनद्वादशीनिर्णयः अथ वैकुंठचतुर्दशीनिर्णयः सा च निशीथव्यापिनी ग्राह्या दिनद्वये तथासत्वे
निशीथप्रदोषोभयव्यापिनी ग्राह्येति निर्णयसिंधावुक्तेः कार्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप सो
पवासस्तु संपूज्य हरिरात्रौ जितेंद्रिय इति हेमाद्रौ भविष्योक्तेश्च इति वैकुंठचतुर्दशी अथ कार्तिकपौर्णमा
सीनिर्णयः कार्तिकशुक्लद्वादशी पौर्णमासी च मन्वादिः सा च पूर्वाह्णव्यापिनी ग्राह्या अन्यत्रायुक्तं कार्ति
की परा ग्राह्या चंमापौर्णिमास्यो परे इति दीपिकोक्तेः आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् मह
ती सा तिथिर्ज्ञेया देवानामपि दुर्लभेति हेमाद्रौ भविष्योक्तेः भागीर्वाचिनदीपिकायां पौर्णमास्यां तु संध्या
यां कर्तव्यस्त्रिपुरोत्सवः दद्यादनेन मंत्रेण प्रदीपांश्च सुरालये कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये
विचरंति जीवाः दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंतु ते निश्वपचा हि विप्राः अत्र कार्तिके यस्य दर्शन
मत्स्यं तत्फलप्रदमिति स्कांदोक्तेः अत्र वृषोत्सर्गः प्रशस्तः महादानानि च देयानीति मत्स्योक्तेः इति श्री
मत्कालोपनामककाल चंद्रिकायां कार्तिकमासनिर्णयः॥ ॥अथ मार्गशीर्षमासनिर्णयः सा च
मार्गशीर्षकृष्णाष्टमी मध्याह्नव्यापिनी ग्राह्या शिवरहस्ये मध्याह्ने भैरवोत्पत्तिश्रवणात् दिनद्वयेऽश

Indira Gandhi National Centre for the Arts

का॰चं॰ नः पूर्णायां चातद्व्याप्तौ पूर्वैव रूद्रव्रतेषु सर्वेषु कर्त्तव्या संमुखी तिथिरिति धर्मतत्त्वकौमुद्यामुक्तं व्रतस्यैव
३६ नीत् इयं कार्त्तिकानंतरं गौणचांद्राभिप्रायेण बोध्यं पंचमी नागपूजायां कार्या षष्ठीसमन्विता इति युग्म
वाक्यात् शुक्ला मार्गशिरे पुण्या श्रावणे या च पंचमी स्नानानुलेपनैर्नागान् इतराल्लचतुर्थीवृता इति मदन
रत्ने हेमाद्रौ स्कांदोक्तेः इति नागपंचमी अथ चंपाषष्ठी इयं मार्गशीर्षशुक्लाषष्ठी चंपाषष्ठी महारा
ष्ट्रेषु प्रसिद्धा सा चतुत्तरयुता ग्राह्या षण्मुन्योरिति युग्मवाक्यात् इयमेव विशेषेण चंपेत्युच्यते॥
तदुक्तं ब्रह्मांडपुराणे मल्लारिमाहात्म्ये मार्गे भाद्रपदे शुक्लाषष्ठी वैधृतिसंयुता रविवारेण संयुक्ता
सा चंपेतीह कीर्तितेति विशाखाभौमयोगेन सा चंपेतीह कीर्तिता इति मदनरत्नोक्तेः इयं योगविशे
षेण पूर्वा परा वा कार्या चंपाषष्ठी सप्तमीयुतेति दिवोदासः इति चंपाषष्ठी अथ यमेव स्कंदषष्ठी सा
च पूर्वयुता ग्राह्या कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भ राम॰
वेत् धर्मतत्त्वकौमुद्यामुक्तेः परेन्हि रात्रिविद्धामेव पारणं भवेद् अन्यथैवान्तरे वेति दिवोदा ३६
सः इति स्कंदषष्ठीनिर्णयः मार्गशीर्षप्रदोषव्यापिन्यां दत्तोत्पत्तिः समुद्भवतीति स्कांदे तस्माद्विषेडो
क्तेः अत्रैवाश्वलायनानां प्रत्यवरोहणमुक्तं मार्गशीर्षस्य प्रत्यवरोहणं चतुर्दश्यां पौर्णमास्यां

वेति तत्सूत्रोक्तेः इति श्रीमत्कालोपनामक॰ कालचंद्रिकायां मार्गशीर्षमासनिर्णयः अथ पौषः
धनुःसंक्रमे पराः षट्घटिकाः पुण्याः अन्यथा प्राग्वत् अथाष्टकानिर्णयः मार्गशीर्षानंतरमष्टम्यां श्र
ष्टकाः कार्याः एवं पौषमासादिमासत्रये पि हेमंतशिशिरयोर्ऋतुर्णामपरपक्षाणामष्टमीष्वष्टका
एकस्यां वेत्याश्वलायनसूत्रोक्तेः एकस्यामपि कुर्वाणाशक्तो चाश्वलायनः अथ स्वो भूते ष्टकाः पशुना
स्थालीपाकेन चाप्यनडुहे यवसमाहरेदग्निना वा कक्षमुपोषेदेषा मेष्टकेति तत्राष्टकान्कार्या चातुर्व
र्णामिति ग्रहणादिति नारायणवृत्तौ कालेपि महालयाष्टकाश्राद्धेपाकर्मादिकमियत् रुपष्टमास
विशेषाख्याविहितं वर्जयेन्मल इति अथ पौषकृष्णाष्टम्यां बुधोत्पत्तिरिति कल्पतरौ भविष्योक्तेः
अत्रैव रोहिणीबुधयोगे पुण्यतमत्वं तत्रैव ज्ञेयं इति बुधोत्पत्तिः अथार्द्धोदयनिर्णयः तदुक्तं म
दनरत्ने महाभारते अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः
समइति अर्द्धोदयः सर्वयोगाल्लिंचिनूत्ना महोदयः पौषमाघयोर्मध्यवर्त्तिनी पौषपौर्णमास्युत
रामावास्येत्यर्थः इति भट्टाः पुष्यस्य माघस्य चेत्यपि मुक्तौ मदनरत्ने तन्न तत्रैव हेमाद्रिविरोधात्
तत्र हि नायं श्लोकः माघामायां व्यतीपाते आदित्ये विष्णुदैवते अर्द्धोदयं तदित्याहुः सहस्रार्कग्रहैः स
मं तत्रैव माघमासे कृष्णपक्षे पंचदश्यां रवेर्दिने वैष्णवेन तु ऋक्षेण व्यतीपाते सुदुर्लभं व्रतं कुर्या

Indira Gandhi National
Centre for the Arts

का॰च॰ द्वितीयन्वयस्तत्रैव ब्रह्मविष्णुमहेशानां सौवर्णीपलसंख्यया प्रतिमास्तु प्रकुर्वीत यास्तदर्द्धेन द्विजोत्तमाः
३९ सार्ग्रंशतत्रयं वापि यथाशक्त्या ततः कुर्याच्छमीद्रोणानां तिलपर्वतः कृत्वोपरि ततो विष्णुब्रह्मणो पूर्वसंक्षया
शय्यात्रयं ततः कुर्यात्सर्वोपस्करसंयुतं संपूज्य विष्णुवर्यभ्यो दत्वेप्सितमवाप्नुयात् स्कांदे अर्द्धोदये
तु संप्राप्ते सर्वं गंगासमं जलं शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः यत्किंचिद्दीयते दानं तद्दा
नं मेरुणा समं अत्र दानविशेषो निर्णयामृते स्कांदे चतुःषष्टिपलं स्वर्णं मंत्रेण तत्र कारयेत् चत्वा
रिंशत्पलं वापि पंचविंशतिरेव वा अमंत्रेणापमंत्रे तनुकांस्यमयं द्रत्युक्तं तत्रैव स्वर्णसुघटितं कांस्य
स्यभाजनमुत्तममिति निधाय पायसं तत्र पलमष्टदलं लिखेत् पद्मस्य कर्णिकायां तु कृष्णमा
त्रं सुवर्णकं तदभावे तदर्द्धं तदर्द्धं वापि कारयेत् भूमौ तु तंदुलैः शुद्धैः कृत्वाष्टदलमुत्तमं अमंत्रेणा
पयेत्तत्र ब्रह्मविष्णुशिवात्मकं तेषां पूजां ततः कुर्याच्छ्वेतमाल्यैः सुशोभनैः वस्त्रादिभिरलंकृत्य
ब्राह्मणाय निवेदयेत् दानमंत्रस्तु सुवर्णपयसा मंत्रेण तस्मात्तत्र त्रयीमयं आपतेत्सारकं पस्मा
त्कृहाण द्विजोत्तम समुद्रवलयोपेता पृथ्वी सा दानतुश्चैव तु यत्फलं तत्फलं लभते मर्त्यः दत्वेदं दानमुत्त राम
मं इति॥ ॥ इति श्रीमत्कालोपनामक॰ कालनिर्णयचंद्रिकायां पौषमासनिर्णयः अथ माघः ३९
अथ माघस्नानं तत्र ब्राह्मे तु साचन उक्तं एकादश्यां शुक्लपक्षे पौषमासि समारभेत् द्वादश्यां पौ

र्णमास्यां वा शुक्लपक्षे समापयेदिति अत्राधिकारिणो भविष्ये ब्रह्मचारी गृहस्थो वा वानप्रस्थोथ भिक्षु
कः बालवृद्धयुवानश्च नरनारीनपुंसकाः स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं वृद्धाशक्ता
द्यस्तु उष्णोदकैः स्नानं कुर्युरिति ब्राह्मोक्तेः यत्र कुत्रापि वा माघे प्रयागस्मरणान्वितः करोति मज्ज
नं तीर्थसत्त्वभेद्गाग मज्जनमिति ब्राह्मोक्तेः माघमासि समुद्रे स्नायादिति पृथ्वीचंद्रोदये प्रभासख
ण्डोक्तेः अथ स्नानकालः माघमासे रटंत्यापः किंचिदभ्युदिते रवौ ब्रह्मघ्नं वा सुरापं वा कं पतंतं पुनीम
हे इति भविष्योत्तरोक्तेः ब्राह्मे त्वरुणोदयकाल उक्तः उत्तमं तु सनक्षत्रं मध्यमं लुप्ततारकं सवितर्युदि
ते भूपतो पहीनं प्रकीर्तितं इति तेनात्राशक्तत्वपेक्षया व्यवस्था ब्राह्मणानां चारुणोदयो मुख्यः
स्नानारंभमंत्रो विष्णुनोक्तः तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकं माघमासमिमं पूर्णं स्ना
स्येहं देव माधव तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि इति प्रत्यहं मंत्राश्च पाद्मे दुःखदारिद्र्यना
शाय श्रीविष्णोस्तोषणाय च प्रातःस्नानं करोम्यद्य माघे पापविनाशनं मकरस्थे रवौ माघे गोवि
दाच्युतमाधव स्नानेनानेन मे देव यथोक्तफलदो भव इमं मंत्रं समुच्चार्य स्नायान्मौनं समन्वि
तः इति प्रत्यहं स्वर्यार्घ्यदानमंत्रश्च पृथ्वीचंद्रोदये पाद्मे सवित्रे प्रसवित्रे च परं धाम जले मम
तत्तेजसा परिभ्रष्टं पापं यातु सहस्रधेति एवं संपूर्णमाघस्नानाशक्तो त्र्यहमेकाहं वा स्नायात्

Indira Gandhi National
Centre for the Arts

का॰ वं॰ ३९ इतिलिंगपुराणात् एकाहं पौर्णमासी अत्र स्यात्सप्तमीमघा च संक्रममाघी चाहतत्येवं माघकृष्णत्र
योदश्यादिवहवः महामाघीपुरस्कृत्य सस्नौ तत्र दिनत्रयं इति त्रयप्रतीमः पाद्मेऽपि स्नात्वाग्निं
नैव सेवयेत् न वह्निं सेवयेत्स्नातो न स्नातोऽपि वरानेन होमार्थं सेवयेद्वह्निं शीतापनुदाय न तु
तिनारदोक्तेः अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः भागत्रयं तिलानां च चतुर्थः शर्करा
न्वितः अत्र प्रत्यहं तिलपात्रदानं ससुवर्णं कुर्यात् कंबलादिवस्त्राणि देयानि उपानहौ तिल
स्नायी तिलोद्वर्ती तिलहोमी तिलोदकी तिलभुक् तिलदाता च षट्तिलाः पापनाशना इति भवि
ष्योक्तेः अत्र हविष्याशी जितेन्द्रियो ब्रह्मचर्यपरायणः प्रत्यहं सुमंगली ब्राह्मणान्भोजयेद्देवीमा
धवोद्देशेन तत्पूजनं च कृत्वा व्रती तिष्ठेदिति ब्रह्मोक्तेः अत्र व्याहृतिहोमः प्रशस्तः अत्र मकर
संक्रांतिनिर्णयो च्यते तत्रोभयतः किमन्यतरः किं यात्र कालः पुण्यः इत्यपेक्षायामुक्तो देवलेन
संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रा इति राम ३९
तद्योगात्संक्रांतियुक्तात्सूक्ष्मकालात् अधऊर्ध्वं च मिलित्वा त्रिंशन्नाड्यः अधः पंचदशना
ड्यः ऊर्ध्वं पंचदशेत्यर्थः तन्निमित्तस्नानदानादिषु पवित्रता शास्त्रकारैः योग्यता कृता इत्य
र्थः माधवेन प्रत्येकं त्रिंशद्दिन इत्युक्तं तत् अतीतानागता भोगानाड्यः पंचदश स्मृताः इति

देवीपुराणे विरुद्धं भुज्यते पात्यते विधिनिषेधावस्मिन्निति भोगः अयं च सर्वास्वपि संक्रांतिषु सा
धारणः उभयतः पुण्यकालः संक्रांतिविशेषे च पूर्वापरकालयोः क्वचित्पुण्यतरत्वं क्वचित्तुल्यत्वं॥
न तु सामान्येन देवलोक्तस्य कालस्य विशेषवचनवशात् क्वचित्पूर्वे व क्वचिदुभयतः पुण्यत्वमिति
व्यवस्थितिः माधवोक्तं युक्तं सामान्यबाधनेन विशेषवाक्येनेव विशेषवाक्यानां निर्वाहात् एवं
सति मध्ये तु विषुवे पुण्यं प्राक् विष्णुदक्षिणायने षडशीतिमुखे तीते अतीते चोत्तरायणे याम्या
यने विष्णुपदे तथा देशानाद्यनंतं विषुवे तु मध्ये वर्तत्यतीते षडशीतिवक्त्रे महर्षयः खल्वयने च
सौम्ये इत्यादीनि विशिष्टलोकास्यादिवचनानि संक्रांतिभेदेन पूर्वोत्तरकालयोः प्राशस्त्या
द्विनिशय प्रतिपादनार्थानि वर्तमाने तु तामेषेनाड्यस्तूभयतो दश विषुवे परमुहूर्तं स्यात्तु
३ षडशीतिमुखे त्रयं तथा विष्णुपदे त्रीणि पुण्यानि कवयो विदुः इति पंचदशघटिकापुण्यत्वो
क्तित्वात् विष्णुपदादिस्वरूपमुक्तं दीपिकायां हर्यैधिर्वृषसिंहवृश्चिककुंभे रविर्वर्तस्य यः संक्रमः
कन्यामीनघटेन तु मिथुनं षडशीतिव्यास्य मन्त्राप्ययोः ज्योक्तं तद्विषुवं च येन मृदकर्कटि
कर्कदक्षिणमिति न पुंक्तमिथुनं पराऽपूर्वभोगिन्यां तत्पौरदयोत्तरं अव्यवधानेन जायमाना

Indira Gandhi National
Centre for the Arts

का॰चं॰ ३९

योदिवापूर्वः प्रशस्तः पुण्यकालो लभ्यते उत्तरभोगिन्यां तस्यास्तत्पूर्वमव्यवधानेन जायमाना
योउत्तरः प्रशस्तः पुण्यकालो लभ्यते तदा सामान्यवचनप्राप्तयोरुत्तरपूर्वकालयोरेव यथायथं
दिवैव दिनाद्यनुष्ठेयं न तु तत्प्रशस्तकाले अन्निसंक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं रात्रौ
संक्रमणे भानोर्दिनार्द्धं स्नानदानयोरिति वृद्धवसिष्ठोक्तेः अर्द्धसंक्रमणे पूर्वभागावच्छि
न्न उत्तरभागावच्छिन्ने वा हरेव पुण्यं न च रात्रिरिति पूर्वदलाधी यथाश्रुतार्थस्य सर्वसाधा
रण पूर्वोत्तरनाडिषु पुण्यत्ववचनादेव प्रतीतेः अर्द्धरात्रात्पूर्वेण दूर्ध्वं पूर्णार्द्धरात्रे वा संक्रमे
तद्दिनमध्याह्नानन्तरं परदिनमध्याह्नपूर्वतः पूर्वदिनमध्याह्नानन्तरं परदिनमध्याह्ना
त् प्राक् यथायथं पुण्यकालः अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया ऊर्ध्वं संक्रमणे
चोर्ध्वमुदयात्प्रहरद्वयं पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकर राम॰ ३९
कर्कटावितिगोभिलोक्तेः तथैवोपक्रमो दिनद्वयस्याद्धावच्छिन्नत्वहेतुः संपूर्णार्द्धरात्रे
तु उदयेस्तमयेपि च मानार्द्धभास्करं पुण्यमपूर्णे शर्वरीदले इति देवीपुराणाच्च आ
सन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः रात्रौ संक्रमणे भानोर्विषुवत्ययने दिनमिति यत्तथा

इति वचनेन विषुवतीसामान्यवचनेसिद्धमर्थमनूद्य अयनोदनार्द्धापवादेन संपूर्णदिनस्य पु
ण्यत्वविधीयते इति वयंप्रतीमः माधवस्तु दिनमिति दिवेति पाठमभिप्रेत्य विषुवती संक्रमे रात्रौ जा
ते दिनार्द्धं पुण्यं अयनसंक्रमे तु दिवाजाते दिनार्द्धं पुण्यं कर्कटे पूर्वार्द्धं मकरे उत्तरार्द्धं तच्च मध्यंदिनो
पजातायमविषयमिति व्याचख्यौ रात्रौ पूर्वोत्तरभागविभागेनयोपन्निर्णयः स कर्कमकरसंक्रा भिन्न४
तिषु निर्णयो बोध्यः मुक्त्वा मकरकर्कटाविति वृद्धवसिष्ठविशेषात् तयोस्तथात्वे तु रात्रावेव स्नानादि
कं कार्यमिति माधवेन भाषितं राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु स्नानदानादिकं कार्यं निशि
काम्यव्रतेषु चेति वृद्धवसिष्ठादिवचनेः सर्वसंक्रान्तिरात्रोपसक्तस्य स्नानादेरपवादे पूर्वोक्तव
चनविशेषेण पर्युदासात् मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः प्रभाते वा निशीथे वा कुर्या
दहनि पूर्वतः कार्मुकं तु परित्यज्य सर्वसंक्रमते रविः प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति
भविष्योत्तरात् दिवैव पुण्यकालत्वं प्रतीयते यद्यपि अत्राहत्य रात्रिनिषेधाप्रतीतेर्याज्ञवल्क
दिवचनस्यातीतवन्नद्विधीनां निर्विषयत्वेनानर्थक्यप्रसङ्गान्नादिवा पुण्यकालत्वं तदपरेन सहते
इतरसंक्रान्तिष्वपि सार्द्धरात्रपुण्यत्वनिषेधकं न वाक्यं स्मिनार्द्धपुण्यत्वोमेकरार्थकीर्तकल्पनोच्च
यनयोरपि तुल्यमिति तेन सर्वसंक्रमेष्वेव रात्रिपुण्यत्ववचनानां दिवास्नानाद्यनुष्ठानास

Indira Gandhi National
Centre for the Arts

का·चं·
४०

भवविषयंत्वंवाच्यं तदपि निशीथे जाते ष्वेवंयुक्तं संक्रमस्तु निशीथे स्यात्त्वयनमासाः पूर्वपश्चिमाः
संक्रांतिकालो विज्ञेयस्तत्र स्नानादिकं चरेदिति भविष्योत्तरवचनाद्दिवा पुण्यमत्ययेन पर्युदासे पू
र्वोक्तार्धनिवृत्तिमात्रप्रतीतौ निर्णयापेक्षायां पूर्वोक्तवचनापर्युदासे पूर्वोक्तार्धनिवृत्तिमात्र
प्रतीतौ निर्णयापेक्षायां पूर्वोक्तभविष्योत्तरवचनात्पर्युदासेनत्वं ज्ञेयं एवं च मकरेस्यास्ता
दूर्ध्वं यदा कदाचिज्जाते उत्तरदिने पूर्वार्धे पुण्यं कर्कटस्यात्पूर्वं यदा कदाचिज्जाते पूर्वदिन एव
उत्तरार्धे पुण्यं इति संक्रांतिनिर्णयः माघकृष्णचतुर्दश्यां यमतर्पणमुक्तमेव हेमाद्रौ यमेन
अनर्काभ्युदिते काले माघकृष्णचतुर्दशी स्नातः संतर्प्य च यमं सर्वपापैः प्रमुच्यते अथ माघ
कृष्णचतुर्थी तिलचतुर्थी सा प्रदोषव्यापिनी ग्राह्या माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः
ये त्वां ढुंढे र्चयंति नित्याः सुरसुरदुर्लभमिति त्रिस्थलीसेतौ लैंगाच्च जागरणाच्च इयमेव कुंद
चतुर्थी सा प्रदोषव्यापिनी ग्राह्या माघशुक्लचतुर्थ्यां तु कुंदपुष्पैः सदाशिवं संपूज्य यो हि राम·
नक्ताशी संप्राप्नोति श्रियं नर इति कालादर्शे कौर्मोक्तेः अथ माघशुक्लपंचमी श्रीपंचमी इयं मा ४०
धवमते पूर्वा हेमाद्रिमते परा माघशुक्लचतुर्थ्यां तु वरमारभ्य च श्रियः पंचम्यां कुंदकुसुमैः
पूजां कुर्यात्समृद्धये ति हेमाद्रौ वाराहोक्तेः चैत्रशुक्लपंचमी श्रीपंचमीति दिवोदासः माघशुक्लस
त

प्तमीरथसप्तमी सा अरुणोदयव्यापिनी ग्राह्या सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी अ
रुणोदयवेलायां तस्यां स्नानं महाफलमिति चंद्रिकायां विष्णूक्तेः इयं मन्वादिः अत्र विशेषो हे
माद्रौ भविष्ये कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलजलं रात्र्यांते चालयेत् यथा स्वदत्वा शिरसि
दीपकं नक्तेन चाल्पते यावत्तावत्स्नानं समाचरेत् इक्षुदंडेन जलं पीत्वा इमं मंत्रमुदीरयेत्
नमस्ते रुद्ररूपाय रसानां पतये नमः वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते जले परि
हरेद्दीपं ध्यात्वा संतर्प्य देवताः स्नानमंत्रश्च ब्राह्मे यद्यज्जन्मकृतं पापं मया सप्तसु ज
न्मसु तन्मे रोगं च शोकं च माकरी हंतु सप्तमी एतज्जन्मकृतं पापं यच्च जन्मांतरार्जितं मनो
वाक्कायजं यच्च ज्ञाताज्ञाते च यत्पुनः इति सप्तविधं पापं स्नानेन सप्तसप्तिके सप्तव्याधिस
मायुक्तं हर माकरि सप्तमि इति स्नात्वा क्रिया चम्पार्घ्यं दद्यात् मदनरत्ने सप्तसप्तिवहप्रीत स
प्तलोकप्रदीपन सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ततः जननी सर्वलोकानां स
प्तमी सप्तसप्तिके सप्तव्याहृतिके देवि नमस्ते सूर्यमंडले इति प्रार्थयेत् सौरागमे अर्क
पत्रैः सबदरैर्दूर्वासितसचंदनैः अष्टांगविधिना चार्घ्यं दद्यादादित्यतुष्टये ततः ताम्र
नलिखेत्पद्ममष्टपत्रं सकर्णिकं मध्ये शिवं सपत्नीकं प्रणवेन च संयुतं पूर्वादिदलेषु र

Indira Gandhi National
Centre for the Arts

का॰ चं॰
४१
विभानुर्विवस्वान्भास्करः सविता सहस्रकिरणः सर्वात्मकान्संपूज्य गृहं गच्छेत् अत्र दानमुक्तं दि
वोदासीये मदनरत्ने च स्नात्वा तिलपिष्टमयं पूर्वोक्तैर्मंत्रैर्यः संपूज्य विप्राय दद्यात् पुनश्च दा
नविशेषो मदनरत्ने भविष्ये ताम्रपात्रे यथाशक्त्या मृण्मये वापि भक्तिमान् स्थापयेत्तिलपि
ष्टं च सगुडं सघृतं तथा कांचनं तालकं कृत्वा अशक्तस्तिलपिष्टकं संछाद्य रक्तवस्त्रेण पुष्पे
र्धूपैस्तथा चैव तु दानमंत्रस्तु आदित्यस्य प्रसादेन प्रातःस्नानफलेन च दुष्टदौर्भाग्यदुःख
घ्नं मया दत्तं तु तालकं पुनर्विशेषो हेमाद्रौ भविष्योत्तरे एवंविधं रथवरं विविधाजियुक्तं हैमं च है
मशतदीधितिना समेतं दद्यान्नमो घतितसप्तमिवासरेयः सोसंगचक्रगतिरेव महीं भुनक्ति
रथपूजनादि कृत्वा धान्यादि च ब्राह्मणाय दत्त्वा ब्राह्मणान्भोजयेदिति यदा माघे मलमासो भ
वति तदा मासद्वयमन्वादिश्राद्धं कुर्यादिति च स्मृतिचंद्रिकोक्तेः इयमेवाचलसप्तमी इयमेव
इति रथसप्तमीनिर्णयः माघशुक्लाष्टमी भीष्माष्टमी माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणं राम॰
श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति हेमाद्रौ पाद्मोक्तेः तर्पणमंत्रस्तु धवलनिबं ४१
ध्ये भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रि
यां वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च अपुत्राय ददाम्येतत्सतिलं भीष्मतर्पणं वसूना

वतारायशंतनोरात्मजाय च अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिण इति इदं जीवत्पितृके
णसव्येन कार्यं जीवत्पितृकेणापि पाद्मोक्तेः अत्र श्राद्धं काम्यं तर्पणं नित्यं तर्पणाकरणे सं
वत्सरकृतं पुण्यं तत्क्षणादेव नश्यति इति मदनरत्ने वचनात् इयं पूर्वविद्धा ग्राह्या युग्मवाक्या
त् इति भीष्माष्टमी माघशुक्ला भीमद्वादशी युग्मवाक्यात्पूर्वविद्धैव ग्राह्या माघी पौर्णिमाप
रेति हेमाद्रिः तत्राश्वलायनानामुत्सर्जनमुक्तं कारिकावचनात् अत्र षोडश महादाना
नि दापनीयानि पल्लिचिंदीपते दाने मेरुतुल्यं तु तद्भवेत् इति हेमाद्रावुक्तेः इति पौर्णिमासी
निर्णयः कुंभे पूर्वाः षोडश घटिकाः पुण्याः शेषं प्राग्वत् अथ फाल्गुनमासनिर्णयः॥
अत्र माघी पौर्णिमास्यानंतरं मघाम्यामष्टकाः कार्याः एकस्यां वा तत्पक्षे अत्रैव कार्यं नि
वृत्तिः अथ शिवरात्रिनिर्णयः फाल्गुनकृष्णचतुर्दशी शिवरात्रिः सा प्रदोषव्यापिनी
ग्राह्या शिवरात्रिश्चतुर्दशीति स्मृत्यंतरोक्तेः प्रदोषव्यापिनीत्येव गम्यते निशीथव्या
पिनी ग्राह्येत्यपि अर्द्धरात्रयुता माघकृष्णा चतुर्दशी शिवरात्रिव्रतं तत्र सोश्वमेधफलं
लभेदिति नारदसंहितोक्तेः तथा च पूर्वेद्युरेव उभयव्याप्तौ पूर्वैव त्रयोदशी यदा चतु

Indira Gandhi National
Centre for the Arts

का॰ चं॰
४२

दिनभुक्तिप्रमाणतः जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशीति स्कान्दोक्तेः दिनभुक्तिरलाभ
पः दिनद्वये निशीथव्याप्तौ हेमाद्रिमते पूर्वा अर्द्धरात्रात्पुरस्ताच्च जयायोगो यदा भवेत्
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति पाद्मोक्तेः परदिने तूभयव्याप्तिसत्वे परैवेति मा
धवः परेद्युरर्द्धरात्रस्यैकदेशव्याप्तौ पूर्वेद्युः संपूर्णव्याप्तौ पूर्वैव व्याप्तार्द्धरात्रे यस्यां तु दृश्यते
या चतुर्दशी तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैरिति माधवधृतेशानसंहितोक्तेः पूर्व
द्युर्निशीथस्पर्शे परेद्युः प्रदोषस्यैकदेशव्याप्तौ पूर्वैव जयायोगप्राशस्त्यात् यदा चतुर्दशी पूर्वे
द्युर्निशीथादूर्ध्वं प्रवृत्ता परेद्युर्निशीथादर्वागेव समाप्ता तदा परेद्युरेकव्याप्तिसत्वात्परैव
दिनद्वये प्रदोषव्याप्त्यभावे परैव निशीथव्याप्तेः इदं च नित्यं काम्यं तथा च माधवीये स्कान्दे राम
परात्परतरं नास्ति शिवरात्रिः परात्परेति न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं जंतु ४२
र्जन्मसहस्रेषु भ्रमते नात्र संशय इति अकरणे प्रत्यवायश्रुतेः इति शिवरात्रिनिर्णयः॥
अथ प्रतिमासशिवरात्रिनिर्णयः निशीथपतिं यो पूर्वपक्षे चतुर्दश्यां पूजयेद्यत्नेन भक्ति
ता तस्यां जागरणं रात्रौ सन्निधाने कृतं तदा तेन कर्मविपाकेन मुक्तो सोपानकेन चेति

ईश्वरवाक्यात् रात्रौ पूजाजागरयोर्विधानादर्द्धरात्रव्यापिनी ग्राह्या सामान्येन रात्रियोगे सती
जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते इति वाक्यात् पूर्वैवेत्याशयेनाह माधकृष्णेन्यतराच्चतु
र्दश्यां तु रात्रिद्वये व अस्ति चेदर्द्धरात्रव्यापिनी शुभनेरा साम्ये तु पूर्वा स्मृतेति स्कान्दे जन्माष्टमी
रोहिणी च शिवरात्रिस्तथैव च पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणमित्यादिविधानात्
शिवरात्र्यादितिथिव्रते नक्षत्रव्रते च तिथ्यन्ते नक्षत्रान्ते च पारणमित्याह तिथिमध्ये पारण
स्कान्देऽप्युक्तं उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणमिति तिथ्यन्ते पारणं कुर्याद्विना शिवच
तुर्दशीमिति इति मासशिवरात्रिनिर्णयः अथ होलिकानिर्णयः फाल्गुनपौर्णमासी
होलिका सा च प्रदोषव्यापिनी ग्राह्या प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा त
स्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे इति नारदीयोक्तेः इयं पूर्वविद्धा ग्राह्या श्रा
वणी दुर्गानवमी दूर्वा च हुताशनी पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मवैव
र्तात् दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रासत्वात् होलिकायां विप्रधात भद्रायां द्वे न क
र्त्तव्ये श्रावणी फाल्गुनी तथेति निर्णयामृतोक्तेश्च यदा पूर्वदिने चतुर्दशी प्रदोषव्यापिनी

Indira Gandhi National
Centre for the Arts

का.चं.
४३

परदिने चन क्षत्र पर्वशात्पूर्णिमा सा यान्हात्प्रागेव समाप्यते तदा पूर्वदिने संपूर्णरात्रौ भद्रास
त्वे परेह्नि प्रतिपद्येव कुर्यात् उक्तं च निर्णयामृते भविष्ये सार्द्धयामत्रयं वा स्याद्द्वितीये दिव
से यदि प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृतेति तन्न प्रतिपदेवर्तेवन्हिः अतः वन्है
वन्हिवृतं न चेति वाक्यात् प्रतिपदा होलिकानन्वाया अत्र चंद्रग्रहणे तदातनोक्तादिशिभ
द्रां वर्जयित्वा पौर्णमास्यां होलिकादीपनं कार्यमिति धर्मतत्त्वज्ञो मुख्यामुक्तेः तथा सर्वेषा
मेव वर्णानां सूतकरादुदर्शने स्नात्वा कुर्माणि कुर्वीत अन्नमन्त्रविजये इति निषेधात् तु
यं सूतके होलेतिवाच्यं तस्योत्तरार्द्धशेषत्वात् वस्तुतस्तु परदिने पौर्णिमा प्रदोषे सत्वे क्रमि
कालस्पर्शे चतुर्थ्यामादि गौणकालग्रहणे मानाभावाद्द्वाभावाश्च ग्रहणकालएव होलाक्र
यैति निर्णयसिंधावुक्तं अत्र प्रथमन्वादिश्च होलिपूजनमन्त्रस्तु अस्माभिर्भयसं एम.
त्रस्तैः कृता त्वं होलि बालिशैः अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति प्रणमेत् ४३
दुताशनी मलमासे न भवति इति होलिकानिर्णयः अत्रैव कृत्यचिंतामणौ पाद्मे
चोक्तो दोलोत्सवः चैत्रकृष्णप्रतिपदादिवसंतोत्सवः सा चोदयव्यापिनी ग्राह्या दिनद्व

ये तथात्वे पूर्वा विद्धैवेति वृद्धवसिष्ठोक्तेः अत्राभ्यंगो नित्यः अत्र विशेषो हेमाद्रौ भविष्ये
चैत्रमासि महाबाहो पुण्ये तु प्रतिपद्दिने यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः न तस्य
दुरितं किंचिन्नाधयो व्याधयो नृपेति श्वपचश्चाण्डालः तथा प्रवृत्ते मधुमासे तु प्रतिपद्यु
दिते रवौ कृत्वा चावश्यकर्माणि संतर्प्य पितृदेवताः वंदयेद्धोलिकाभस्म सर्वदुःखोप
शांतये मंत्रश्च वंदितासि सुरेन्द्रेण ब्रह्मणा शंकरेण च अतस्त्वं पाहि नो देवि भूते भू
तिप्रदा भव चूतमग्र्यं वसंतस्य माकंदकुसुमं नव सचंदनं पिबाम्यद्य सर्वकामार्थसिद्ध
ये चैत्रकृष्णवसंतपंचमी सर्वत्र प्रसिद्धा चैत्रामावास्या मन्वादिः सा च पराह्नव्यापि
नी ग्राह्या कृष्णपक्षत्वात्॥ ॥इति श्रीमत्कुलोपनामकभट्टरामेश्वरात्मजभट्टमह
देवद्विजवर्याग्रसूनुबालंभट्टानुजदिवाकरविरचितायां कालनिर्णयचंद्रिकायां पाव
वसंतकृत्यनिर्णयः॥ ॥अथ मलमासः तत्रैव मासे सङ्क्रान्तिरहितः सितादिश्चान्द्रोमा
सो मलमासः एकसंक्रांतिरहितो मासः संक्रांतत्वेन संक्रांतिद्वितयेकत्वेन च भवतीति मल
मासो द्विधा अधिमासः क्षयमासश्चेति यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा

क्षा१

Indira Gandhi National
Centre for the Arts

का·वं ४४ सावनो यो मासः स्यात्तु त्रयोदश इति काठकगृह्योक्तेः तथा च राशिद्वयं यत्र मासे संक्रमेत दिवा
करः नाधिमासो भवेदेष मलमासस्तु केवलमिति सत्यव्रतोक्तेः अधिकमासस्य काल निर्ण
यमाह वसिष्ठः द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा घटिकानां चतुष्केण पतत्याधि
कमास इति एतच्च सावनादिमासेन संभवार्थं न तु नियमार्थं अन्यथा षोडशदिनाधि
कद्वात्रिंशन्मासानंतरं कृष्णपक्षनियमेन शुक्लादित्वभंगापत्तेः तन्न्यूनाधिककाले म
लमासपातेपि न दोषः अत एवोक्तं माधवीये मासे त्रिंशे भवेदिति क्षयस्यापि ज्योतिः
शास्त्रे असंक्रांतिमासोधिमासः स्फुटं स्याद्विसंक्रांतिमासः क्षयाख्यः कदाचित् क्षयः का
र्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येधिमासद्वयं च एकः क्षयात्पूर्वः स्यात्परतश्चैक इ
त्याधिमासद्वयं संभवतीत्यर्थः अत्र विशेषमाह जाबालिः मासद्वये द्वमध्ये तु संक्रांतिर्न
यदा भवेत् प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तर इति उत एव कालाधिक्यं न पूर्वस्मि राम ४४
न्नित्यर्थः यत्तु ब्रह्मसिद्धांते चैत्रादर्वाक् नाधिमासः परतस्त्वधिको भवेत् तत्र पूर्वसं
क्रांतद्वये पूर्वाधिकं कृत्तुं इत्यर्थः तच्च ज्योतिःसिद्धांते घटकन्यागते सूर्ये वृश्चिके वा
पर१

यधन्वनि मकरे वाथ कुंभे वा नाधिमासो विधीयत इति वृश्चिकादित्रये मलमासे
सति पूर्वतुलाकन्यागते सूर्ये क्षयात् पूर्वकालाधिक्यनिषेधार्थं न त्वाधिकमासस्य
दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित् नपुंसकत्वं भवतीत्यर्षशास्त्रविनि
श्चय इति हेमाद्रौ विष्णुधर्मविरोधात् मलमासेष्टकादिनिषेधानुपपत्तेश्च मकरे वा
कुंभे भवेतिदृष्टांतार्थप्राप्त्यभावात् क्षयमासागमकालस्तूक्तः सिद्धांतशिरोमणौ गता
ब्ध्यद्रिनंदैर्मितेशाककाले तिथीशैर्भविष्यत्यथांगाक्षसूर्यैः गजाद्र्यग्निभूभिस्तथा
प्रायशोयं कुवेदेंदुवर्षैः क्वचिद्गोकुभिश्चेति अब्धयश्चत्वारः अद्रयः सप्त नंदाः
एषां प्रातिलोम्येन पाते ९७४ तैर्मिलितैर्वर्षैः क्षयमासः पूर्वं जात इत्यर्थः ति
थयः पंचदश ईशा एकादश ११ १५ एवं मितेपाते कृष्णे भविष्यतीत्यर्थः अंग ६ अक्ष
५ सूर्य १२ एकत्र १२५६ गज ८ अद्रि ७ अग्नि ३ भूमि १ एकत्र १३७८ कु १ वेद ४ इंदु १
एकत्र १४१ गावः ९ कु १ एकत्र १९ एतैर्मिलितवर्षैः पाते कृष्णे भविष्यतीत्यर्थः अथ
मलमासे कार्याकार्यनिर्णयः ततः जाबालिः नित्यनैमित्तिके कुर्याज्ज्राद्कुपीम

Indira Gandhi National Centre for the Arts

का॰चं॰ ४५ ल्मिम्लुचेति नक्षत्रवारोक्तं काम्यं नैव कुर्यात्कदाचन अयं च काम्यनिषेधः आरंभसमा
प्तिविषयः असमाप्तानामयभासान्नेतेषु मलमासमनः व्रतानां चैव यज्ञानां आरंभश्च समा
पनमिति तेनैवोक्तत्वात् असूर्याधिकमासः तपनमंडलपरे स्ववचनात् कारीषा
देः काम्यस्यत्वारंभश्च समाप्तिर्भवत एवेत्यादिरन्यत्र विस्तरः कालकौस्तुभेपि मलेनन्य
गतिं कुर्यान्नित्यनैमित्तिकौ क्रियामिति नैमित्तिकानि दीपिकायामुक्तानि यन्नैमि
त्तिकमनित्यं नकृतानुगतान्याधानगर्भसंस्कारादि विलेपनेस्तनिपुनः प्रोक्तं प्रतिष्ठा
दिकमिति गत्यंतराभावे तु सोमयागादिहे यमेव धर्मसंस्कारेण बालादर्शेष्टयान्यु
ष्टयान्युक्तानि द्वादशाहसपिंडानं कर्मग्रहणजन्मनोः सीमंतपुंसवश्राद्धद्वावेतो
जातकर्म च रोगशांतिरलभ्ययोगश्राद्धव्रतानि च प्रायश्चित्तनिमित्तस्पर्शवास्तु
र्वपात्रेच अघोदकुंभमन्वादिमहालययुगादिषु श्राद्धदर्शप्रत्याहिकश्राद्धमन्वा राम॰
दिमासिकं मलिम्लुचान्यमासेषु मतानामाश्राद्धमासिकं श्राद्धं तु पूर्वदृष्टे तीर्थे षष्टि ४५
युगादिषु मन्वादिषु च पदानं दानं देवं दिनं च पतत्तिलगोभूहिरण्यानां संध्या

पासनयोः क्रिया पूर्वहोमश्च ग्रहणास्नानमिष्टिश्च पर्वणि नित्याग्निहोत्रहोमश्च देवतातिथिपूज
नं स्नानं च स्नानविधिना ह्यभक्ष्यापेयवर्जनं तर्पणं वा निमित्तस्य नित्यत्वाद् भवत्वे चेति ए
नौ पुंसवनसीमंतौ एतच्च गर्भाधानाद्यन्नप्राशनांतसंस्कारोपलक्षणं तदुक्तं दीपिकायां
गर्भाधानमुखचौलविधितः प्राग्जातयागं विना कृच्छ्रेष्वाग्रयणं गजेंद्रपुरतः छाया मघा नंयो
गास्तिथिदुःक्षययोश्च पित्र्यमधिके मास्येषु माघ्या चरेदिति अलभ्ययोगेऽर्कोदयमघरुद्रो काम्या
न्यपि व्रतादीनि कार्याणीत्यर्थः पूर्वपरत्र मले भुक्ते चेत्यर्थः महालयशब्देन मघात्रयोदश्युच्य
त इति माधवः दर्शश्राद्धं मले पित्र्याध्य पत्नुक्तप्रायोंगः संवत्सरादतिरेकेण मासोपस्य मलिम्लु
चः तस्मिंस्त्रयोदशश्राद्धं न कुर्यात् विंदुसंक्षेपइति तत्काम्यदर्शश्राद्धविषयं काम्यं नैव कदा
चनेति वचनात् दर्शे च काम्यं शुद्धिकन्यां कन्या वेदिनश्चेत्यादिना याज्ञवल्क्योक्तेः नित्यं तु
मलेभवत्येव दर्शे प्रत्याहरश्राद्धदाने च प्रतिवासरं गोभूतिलहिरण्यानां मासेस्यान्मलिम्लु
च इति मात्स्योक्तेरिति हेमाद्र्यादयः दिवोदासीये तु अनिर्दुरिंदुपूर्णाच हरिवासरोऽथवा
ष्टमी नाधिमासे परित्याज्याः सीमंतान्नप्राशने शिशोरिति अनिर्दुर्दर्शः द्विविधमप्य

Indira Gandhi National
Centre for the Arts

का॰ चं॰ माश्राद्धं न कार्यमित्यपरार्कः तत्र यद्विहितं कुर्यादुत्तरे उत्तरे मासिकार्थं इत्युक्तेः षष्ठ्यास्तु द्विवेशोर
४६ निशुद्धमासकृत्रणेपि शास्त्रार्थोपपत्तेः दोषः मलेन कार्यमिति प्राचीनगौडाः शूलपाणिअस्तंव
त्सरप्रतीपेपि एकराशिस्थिते सूर्ये पक्षाद्दर्शद्वयं भवेत् दर्शश्राद्धं तदादौ स्यान्नपरत्र मलिम्लु
चेति अत्रापि प्रागवद्व्यवस्था यद्यपि कालादर्शे सर्ववार्षिकं मासद्वये कार्यमित्युक्तं तथा हेमाद्रि
माधवपरार्कादिमतात् प्रथमवार्षिकं मलमासे द्वितीयाद्याब्दिकं तु शुद्धमास एव कार्यं असंक्रा
न्तेपि कर्तव्यं आब्दिकं प्रथमं द्विजैः तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति हारीतोक्तेः आब्दिकं
प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे चतुर्दशे तु संप्राप्ते कुर्यात्पुनराब्दिकमिति स्मृत्यंतरोक्तेश्च पु
नराब्दिकं द्वितीयवार्षिकं त्रयोदशमासे अतीते चतुर्दशाद्यादिने कुर्यादित्यर्थः यत्तु सत्यव्रतः
वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथेति तद्द्वितीया राम॰
दिवार्षिकविषयं आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे इति पूर्वोक्तवचनात् तेन द्वितीया ४६
दि शुद्धमास एव कार्यं पृथ्वीचंद्रोदये दिवोदासीये मदनपारिजातादिषु चैवं मलमासमृतानां
तु यदा स एवाब्दिकः स्यात्तदा तत्रैव कार्यं यदाह पैठीनसिः मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं

मलमासेपि कर्तव्यं नान्येषां तु कथंचनेति यत्तु वृद्धवसिष्ठः आब्दिके यदहनि संप्राप्ते अधिमासो भवे
द्यदि मासद्वयेपि कुर्वीत श्राद्धमेवं न मुह्यतीति यच्च व्यासः उत्तरे देवकार्याणि पित्र्यकार्याणि चोभ
योरिति तन्मासिकादिविषयं योगादिकं मासिकं च श्राद्धं चापरपाक्षिकं मन्वादिकं तैर्थिकं च
कुर्यान्मासद्वयेपि चेति चंद्रिकोक्तेः तैर्थिकं तीर्थश्राद्धं च मासद्वयेपि कार्यमिति त्रिस्थलीसेतौ
भट्टाः केचित्तु प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं मन्वादौ च युगादौ च तन्मासोरुभया
रपीति मरीचिवचनात् वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि मासद्वये तु तत्कुर्याद्व्याघ्रस्य व
चनं यथेति गालवोक्तेश्च प्रत्याब्दिकं मासद्वयेपि कार्यमित्याहुः । प्रतिमासमृताहे च क्रियमाणं च
मासिकं प्रतिसांवत्सरं क्रियमाणं कल्प्यादिश्राद्धं मरीचिवचने सोमदनरत्नेन व्याख्यानात् गा
लवस्य च मासद्वयात्मके क्षयमास इति माधवेन व्याख्यानात् यच्च केचिदुक्तं प्रथमाब्दिकं मा
सद्वये कार्यं आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे चतुर्दशे तु संप्राप्ते कुर्वीत पुनराब्दिक
मिति गालवोक्तेरिति तदपि चिंत्यं पुनराब्दिकं द्वितीयाद्यवार्षिकं त्रयोदशे तीते चतुर्दशे कुर्यात् ॥
अन्यथा सांवत्सरं न वर्द्धत श्राद्धं तत्र मृतेहनि इति पैठीनसिविरोधः स्यादिति हेमाद्रौ पृथ्वीचं

Indira Gandhi National
Centre for the Arts

का॰ चं॰ ४७

क्षयेपि च एतेनन च वर्द्धितन षष्ठ्याद्युद्देशे कृष्णादेवेत्यनंतभट्टव्याख्यानाभावात्परास्ता पूर्वव्याख्यायां
तु हारीतवचने प्रथमग्रहणमेवमाने यद्यपि निर्णयामृते पूर्वोक्तकालादर्शवचनान्मलमासे श्राद्धदिनस्य
वध्यत्वनिरासार्थं पित्र्युद्देशेन ब्राह्मणान्भोजयित्वा शुद्धमासे सपिंडकश्राद्धं कुर्यात् पिंडवर्जमसंक्रा
तौ संक्रांतौ पिंडसंयुतं इति सांवत्सरश्राद्धमेव मासद्वयेपि चेति वृद्धपराशरोक्तेरिति तदपि चिंत्यं पू
र्वोक्तवचनस्य क्षयपूर्वभाग्याधिकमासविषयत्वात् तत्र हि मासद्वयश्राद्धमुक्तं तदाह सत्यतपाः एकस्मि
न्यदा मासः संक्रांतिद्वयसंयुतः मासद्वयगतं श्राद्धं क्षयमासेपि शस्यते इति मासद्वयगतं पूर्वासंक्रांति
गतं क्षयगतं च मलमासक्षयमासे अपि श्राद्धं तत्र पूर्वाधिके चेति हेमाद्रौ दीपिकायां तत्र प्राप्या
धिकमासंक्रांतिपदमेव तत्र सांवत्सरं तस्मिन्शुद्धतया क्षये च वचने कृष्णाद्वयोः कोविद इति क्रांत्या
दर्शे अनित्यमनिमित्तं च दानं च महदादिकं अन्याधानाध्वरण्यं तीर्थयात्रा मले क्षणः देवा
गारामतडागादिप्रतिष्ठा मौंजीबंधनं आश्रमस्वीकृतिः काम्यवृषोत्सर्गस्य निष्क्रमः राजाभिषे
कः प्रथमचूडाव्रतबंधतानि च अन्नप्राशनमारंभो गृहाणां च प्रवेशनं स्नानं विवाहो नामानि प्र
तिमन्नमहोत्सवः व्रतारंभः समाप्तिश्च काम्यकर्म च पापनो प्रायश्चित्तं तु सर्वस्य मलमासे वि
वर्जयेत् उपाकर्मोत्सर्जनं च पवित्रं दमनार्पणं अवरोहणं हेमंतः सर्पाणां बलिरष्टकाः इ

राम ४७

ईशानस्य बलिर्विष्णोः शयनं परिवर्तनं दुर्गेंद्रस्थापनोत्थाने ध्वजोत्थानं च वर्जितम् पूर्वत्र
प्रतिषिद्धानि परत्रान्यपि द्विरुक्तिरिति अत्र मलवचनानि हेमाद्रिमाधवादिभ्यो विशेषा निर्दि
ष्टा दाक्षायणीयेपि यात्रोत्सवं च देवादि शापथं दिव्यमेव च मलमासे न कुर्वीत व्यासस्य वचनं तथेति
अयनिर्णयः क्षयमासे पितृयः रविसंक्रमहीनेपि वर्ज्यावर्ज्यविधिः स्मृतः स एव तु द्विसंक्रां
ते क्षयमासस्य पूर्वोत्तरदिने इति काठकस्मृतेः क्षयमासमृतानां प्रत्याब्दिकविशेषो हेमाद्रौ निर्ण्य
द्वि प्रथमे पूर्वाद्वितीयार्द्धं तथोत्तरः मासावपि निबंधः स्थितौ क्षयमासस्य मध्यगौ आदिवृं
वृद्धौ पत्नेपि तेयं मलमासे वर्ज्यमुक्तं न स्पृहक गुर्वास्तादिषु अपि तेयं तदाह बृहस्पतिः बालेवं
द्वयादि वाक्यं मध्ये वास्तं गते रवौ मलमासे च तानि वर्जयेद्देवदर्शनमिति अनादिदेवता
दृष्टास्मृतिस्तु नष्टभागे वे मलमासेप्यनावृत्त तीर्थयात्रां विवर्जयेत् अवर्जितार्पिदोषेभावमा
ते न तु फलमिति वाचस्पतिमिश्राः तन्न असतिबाधके फलहेतुत्वक्षतेः लल्लोपि नीचस्थवक्र
स्थस्य पतिचराते बालवृद्धास्तगे वा संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा
मौंजीबंधो गनालोपनिमाविधिवास्तुप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशि
स्थिते चेति दीक्षापदं दीक्षा आश्रमदीक्षा च तथा उद्यापनं चूडाव्रतबंध दीक्षा विवाह यात्राश्च

Indira Gandhi National Centre for the Arts

का॰ चं॰ ४८
वधूप्रवेशः नरागकूपत्रिदशप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्यात् दिवोदासीये गुर्वादित्ये गुरौ सिंहे
नष्टे शुक्रे मलिम्लुचे गृहकर्म व्रतं यात्रां मनसापि न चिंतयेत् अस्यापवादस्तत्रैव ब्राह्मे मुंडनं चोप
नायनं च गोतम्यां सिंहगे गुरौ कन्यागते तु कृष्णायां न तु तत्तीरवासिनां तथा आषाढ्यां गोतमी गंगा
द्वितीया जाह्नवी स्मृता सर्वतीर्थफलं स्नानात् गोतम्यां सिंहगे रवौ संहिताप्रदीपे स्यात्तत्रापवादे
गुरुशुक्रयोश्च बालत्वमन्हां दशकं च वार्द्धे वृद्धौ सिते ज्या वृष्णुमौ शिशुत्वे शास्त्रोपनस्त्रा वपचोप
मानो वसिष्ठः अतिचारगते जीवे वर्जयेत् तदनंतरं व्रतोद्वाहादिकार्येषु अष्टाविंशतिवास
रान् बाल्यादिलक्षणमुक्तं बृहस्पतिः द्वौते रविणा सह निरंन्येषां ग्रहाणामस्तउच्यते ततो वी.
क्षाद्बुधं प्रोक्तं तुर्द्ध्वे बाल्यं प्रवृत्तिं न भिन्नं बाल्यादिपरिमाणं वृत्तशते बालः शुक्रो दिवसदशकं प
चकं चैव वृद्धः पश्चादन्हां त्रितयमुदितः पक्षमोन्यं क्रमेण जीवो वृद्धः शिशुरपि तथा पक्षमन्यैः
शिश्नोत्तप्रोक्तो विज्ञे दिवसदशकं चापरे सप्तरात्रं पश्चिमउदये दशदिनानि बालः अस्ते पंचदि
नानि वृद्धः पूर्वतो दिनत्रयं बालः पक्षं च वृद्ध इत्यर्थः जीवो गुरुः अन्यत्व अन्यथोक्तं प्रा
कूपश्चादुदितः शुक्रः पंचसप्तदिनं शिशुः विपरीतं तु वृद्धत्वं तत्तदेव गुरोरपि एषां च पक्षाणां व्यव
स्थामाह मिहिरः वहेवोदर्शिनाः कालत्रयं बाल्यं वार्द्धक्यं च ग्राह्यान्यत्रापि कोशो यादेशभेदादुदीर राम॰ ४८

चयवीपेर

नाहुति देशभेदश्च मदनरत्ने गर्गः शुक्रो गुरुः प्राक् च परा क्रुच बालो विंध्ये दशाहं त्रिसप्तरात्रं वंगे
हूणेषु च षट् च पंच शेषे च देशे त्रिदिनं वदंति अस्तादेरपवादः काशीखंडे न ग्रहास्तादयः कृतोदो
षा विश्वेश्वरालये त्रिस्थलीसेतौ गोदावर्यां गयायां च श्रीशैले ग्रहणाद्वये सुरासुरगुरूणां च मौ
ढ्यदोषो न विद्यते ग्रहणद्वयेन त्रिभिन्न कुरुक्षेत्रयात्रादानादावित्यर्थः तदाह त्रिस्थलीसेतौ ल
ल्लः उपप्लवे शीतलभानुभान्वोः दर्शोदये वै कपिलाख्यषष्ठ्यां सुरासुरेज्यास्तमयेपि तीर्थयात्रावि
धिः संक्रमणे च शस्तः इत्यलं बहुना मलमासे च व्रतविशेषो उक्तो हेमाद्रौ पाद्मे अधिमासे तु सं
प्राप्ते गुडसर्पियुतानि च त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने खाद्यानि गुडमिश्राणि अ.
धिमासे नृपोत्तम अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः उद्दिश्यापूपदानेन पृथ्वीदानफल
लभेत् त्रयस्त्रिंशति पूपान् कांस्यपात्रे निधाय च सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत्
तत्र मंत्रः विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः अपूपान्नप्रदानेन मम पापं व्यपोहतु ना
रायणजगद्बीज भास्करप्रतिरूपक व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय यस्य हस्ते गदाचक्रं
गरुडो यस्य वाहनः शंखः करतले यस्य स मे विष्णुः प्रसीदतु कलाकाष्ठादिरूपेण निमेषघटि

Indira Gandhi National Centre for the Arts

का॰ चं॰ कादिना योवंचपनिभृतानि तस्मैकालात्मनेनमः कुरुक्षेत्रमयोल्लोकः कालःपर्वद्विजोहरिः
४८ पृथ्वीसममिदंदानंगृहाणपुरुषोत्तम मलानांचविशुद्ध्यर्थं पापप्रशमनायच पुत्रपौत्राभि
वृद्ध्यर्थंददामितवभास्कर मंत्रेणानेनयोदद्यात्त्रयस्त्रिंशदपूपकान् प्राप्नोतिविपुलांलक्ष्मीं
पुत्रपौत्रादिसंपदमिति इतिनिर्णयसिंधावनुसारिमलमासनिर्णयः स्मृत्यर्थसारंहेमाद्रिं
पारिजातंचमाधवं दीपिकाः सिंधुमुख्योदीन्विलोक्यैवमयाकृतं॥ ॥इतिश्रीमत्कालोप
नामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूरिसूनुबालंभट्टानुजदिवाकरविरचिता
यांकालनिर्णयचंद्रिकायांमलमासोनवत्सरकृत्यनिर्णयईरितः॥ ॥अथग्रहणादिविशे
षनिर्णयः तत्रादौग्रहणनिर्णयः माधवमतेतुकुतोतमोक्तेवेधेउपवासदर्पग्राह्यः सू
र्यग्रहेतुनाश्नीयात्पूर्वंयामचतुष्टयं चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्विना विष्णोग्रस्तो राम ४८
दयेरस्ते~~पूर्वेह्निरेवौचनभोक्तव्य~~मदनरत्नेगर्गः संध्याकालेयदाराहुर्ग्रसतेशशिभास्करौ
तदहर्नैवभुंजीतरात्रावपिकदाचनेति सायंसंध्यायस्यग्रस्तोस्तपूर्वेह्निरात्रौचनभो
क्तव्यं प्रातःसंध्यायांचंद्रग्रस्तस्यग्रस्तास्तात्पूर्वरात्रौत्तरेह्निचनभोक्तव्यइत्यर्थः बालादीनां

तुयथादंडकेवेधः बालवृद्धातुरावृतइतिपूर्वोक्तेस्तद्विषयोक्तः सायान्हेग्रहणंचेत्स्यादपराह्णे
का॰ चं॰ वभोजनं अपराह्णेनमध्यान्हेमध्यान्हेनतुसंगवे भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रि
५० येतिनिर्णयसिंधौधर्मतत्वकौमुद्यांचमार्कंडेयवचनात् औरनालपयस्तक्रंदधिस्नेहाद्यपाति
तंमणिकस्थोदकंचैवनदुष्येद्राहुसूतके इतिज्योतिर्निबंधेमेधातिथिनाएतेषांपुनिप्रसवः कृतः
गृहेजलेगांगगृहेशीतजलेपीत्वापादकृच्छ्रंसमाचरेदिति तत्रैवोक्तेः अत्रादौतयोःस्नानंकुर्या
त मोक्षस्नानेसकृतेनपुनर्ग्रहणंयावद्यातितावत्सूतकीभवेदिति देवदत्तनिबंधोक्तेः ग्रस्य
मानेभवेत्स्नानंग्रस्तेहोमोविधीयते इतिग्रहणनिर्णयः

राम ५०

Indira Gandhi National
Centre for the Arts

कालचंद्रिकासमाप्ता पत्रसंख्या ५०

[illegible]॥

Indira Gandhi National
Centre for the Arts